तारापंचांग

नं. १५६

5968

1. → 7
2. → 8
3. → 6
4. → 17

11:1

Complete

तारापंचांगः

ॐ श्रीगणेशाय नमः ॥ ॐ श्रीताराभगवत्यै नमो नमः ॥
श्रीदेव्युवाच ॥ भगवन्सर्वधर्मज्ञ सर्वागमविचक्ष
ण ॥ श्रीमन्महोग्रतारायाः तत्वं यद्भवतापरे ॥ सूचि
तं यत्स्वरूपं भो ये कथयस्व वृषध्वज ॥ श्रीभैरवउवाच
श्रीतारा परमा विद्या जगच्चैतन्यरूपिणी ॥ नातः प
रतरा विद्या नातः परतरा मनुः ॥ एकदा महाशिख
रे जपान्तस्था महामनोः तुष्टा बभूव मे देवि महानारा
महेस्वरी ॥ तस्याः प्रसादादेवेशि सर्वं तस्य जगत्प्रभुः ॥
ग्रासे नीलसरस्वत्याः प्राविनोस्मय पार्वति ॥ श्रीदे

भुवाच ॥ देवेश करुणांभोधे भक्तानां वरदायक ॥ श्री
मन्महोग्रनारायाः नत्वविद्यां वद प्रभो ॥ श्रीभैरवउवा
च ॥ शृणु देवि प्रवक्ष्यामि भैरवि प्राणवल्लभे ॥ श्रीनारि
ण्या महादेवि नत्वविद्यां ब्रवीमि ते ॥ ब्रवीमि नत्वविद्या
याः पंचांगं देव दुर्ल्लभं ॥ सर्वस्वं ते रहस्यं मे न प्रकाश्यं
कदाचन ॥ पटलं नत्वरूपं च पद्धतिं नत्वरूपिणीं ॥
कवचं मंत्रगर्भं च नंत्रसारमयं मम ॥ सहस्रं मंत्रग
र्भं च मंत्रनाम सहस्रकं ॥ नवभक्त्या ब्रवीम्यद्य मूल
विद्या महेश्वरि ॥ प्रजादौ मूलमंत्रं तु कथयामि नव

ता॰
प॰
२

प्रिये ॥ अथ भेदान्प्रवक्ष्यामि तारिण्याः सर्वसिद्धिदान् ॥
येषां विज्ञानमात्रेण जीवन्मुक्तो भवेद्ध्रुवं ॥ वह्निवामाक्षि
बिन्द्वाढ्या कामिका भुवनेश्वरी ॥ भुवनेशी वर्म रुद्धा फ
डंता प्रणवादिका ॥ समाह्वरी महाविद्या विरिंचिसमु
पासिता ॥ वाक्शक्तिः कमला कामो हंसो नुग्रह सर्गवा
न् ॥ वर्माद्य तारे वर्मास्त्रं विसर्गो द्वादशाक्षरी ॥ तारवर्म
शिवाकामा मनु सप्तयुतो भयः ॥ वर्मास्त्र मेषा समाख्या
सिद्धिदा विस्मृसे विना ॥ एनयोः पंचमे बीजे सकारेंद्रा
दिरो निमः ॥ नदा विद्या ह्वयं प्रोक्तं चतुर्मुखसमर्चिते ॥

ड४ नारोमायावर्ममायावर्मास्त्वंचरमाहरी ॥ हरिरग्नि
स्त्विमहन्नींद्युगवन्निपुटिनाद्दिजा ॥ प्रसन्नांतां पंचवर्णं
यं प्रोक्तमेकनाटाह्वयं ॥ रेफशांतींदुकंणांतैर्वर्मास्त्रं पु४
कामवाग्भवम् ॥ नारायणोपासिनेयं पंचार्णा सर्व
सिद्धिदा ॥ अस्यास्याष्टविद्यानां ऋषिः शक्तिर्वसिष्ठजः
गायत्री तारकेछंदो देवते परिकीर्तिते ॥ षड्दीर्घमा
ययाचैवन्यासमस्तु परिकीर्तितः ॥ अथध्यानं प्रवक्ष्या
मि साधकानां हिताय च ॥ येनैवध्यानमात्रेण नाराश्रा
डुर्भविष्यति ॥ श्वेतांबरां शारदचंद्रशुभ्रां सद्भूषणां

चंद्रकलावतंसां ॥ कर्त्रीकपालान्वितपाणिपद्मां नारीं त्रि
नेत्रां प्रभजेखिलर्द्ध्यै ॥ रक्तां वशे स्वर्णवर्णां स्तंभने मारणे
सितां ॥ उच्चाटने धूम्रवर्णां शांतौ श्वेतां स्मरेदिमां ॥ भूरि
णा किमहोक्तेन विद्या । एताः प्रसाधिता ॥ पूरयेत्साखिले
ष्टां मनोरथमिह ध्रुवं ॥ अथ वक्ष्यामि नारायाः यंत्रोद्धा
रमनुत्तमं ॥ भोगमोक्षप्रदं देवि गोप्यं क्रमहेश्वरि ॥
विंदुस्त्रिकोणं च षडस्रवृत्ते हृत्तेनयाष्टारदलं त्रिवृत्तं
सभूपुरं चैकजटाविलासं गेहं मयायं त्रमिदं प्रदिष्टं
अथ संपूजयेत्पीठे देवीं स्वस्योपचारकैः ॥ महीरहच

नर्दिक्षुगणेशाद्यान्प्रपूजयेत् ॥ पाशांकुशौ कपालं च त्रि
शूलं दधानैः करैः ॥ अलंकारचयोपेतं गणेशं प्राक्सम
र्पयेत् ॥ कपालशूले हस्ताभ्यां दधानं सर्पभूषणं ॥ स्वस्
यवेष्टिते रम्ये वटुकं दक्षिणे र्चयेत् ॥ असिशूलकपाला
नि डमरुं दधानं करैः ॥ कृष्णं दिगंबरं क्रूरं क्षेत्रपं पश्चि
मे यजेत् ॥ कपालडमरू पाशं लिंगं सा बिभ्रती करैः ॥
स्वच्छकल्पारक्तवस्त्रा योगिनीः उत्तरे यजेत् ॥ अथ ना
गराज्ञ्त्वस्येष्टदाष्टफलप्रदा ॥ ऊर्ध्वकेशो व्योमकेशो २
नीलकंठो वृषध्वजः ॥ दिक्पो वाः सिद्धिदा देवी सिद्धो चा

ता॰
प॰
४

तुष्टएतैवतः॥ वसिष्ठाकुमेनागौश्चलीलनाथोहंसीश्वरः
हरिनाथोमानवैवोद्यानतुष्टएवदास्यामिमद्गुरुं॥ नारावनी
भानुमतीकथितेनतारिणीकृल॥ जनार्दनानंदनाथवि
रूपाह्वस्तथैवच॥ फेरव्यंवावज्रपुष्पंपत्नीछुहुंफट्स्वा
हा॥ दायाददेवतन्मध्येवज्रपुष्पंचपूजयेत्॥ आह्लाद
देववज्रेचसम्यक्पुष्पंसमर्चयेत्॥ माणिरामवाजपे
यनंदनाथवज्रपुष्पं॥ श्रीशिवानंदनाथस्यवज्रपुष्पं
समर्चयेत्॥ श्रीज्ञानानंदनाथस्यैवंश्रुकानंदमेवच॥
श्रीमच्छ्रीसम्यग्रुकेनवज्रपुष्पंसमर्चयेत्॥ अज्ञोभ्यं

5

पूजयेन्मूर्ध्नि देव्या मंत्रऋषिं शुभं ॥ पूर्वतोप्यवज्रशृंगं च
प्रतीच्छानलवल्लभा ॥ पूर्वतोप्यूजने मंत्रः षट्कोणे
षु षडंगकं ॥ विरोचनं चामितामं पद्मनाभाभिधं तथा ॥
शांखपांडुरमेतं च दिग्दलेषु प्रपूजयेत् ॥ लामकं मा
मकं चैव पांडुरं तारकं तथा ॥ विदिग्गतेषु पत्रेषु पूज
येद्दष्टसिद्धये ॥ सविंदुनामा वर्णाद्या सेव्यं येनास्तथा
भिधाः ॥ वज्रशृंगप्रतीच्छाग्निप्रियांताः प्रणवादिकाः ॥
वैरोचनादिपूजायां मंत्रा नवः परिकीर्तिताः ॥ भरहस्य
चन्द्रदिग्द्वपस्यानकयमांतकौ ॥ विघ्नांतकाभिधं पश्चा

विघ्नांतकाभिषेकः

ता॰ त्वंतकर्मिणियंजेत्पूर्णाक्रांदीक्षापिवज्रादीस्पृजयेनदनेंत
प॰ रं॥विंद्रोसंपूजयेद्देवींनारांत्रिभुवनारिणीं॥इत्यंसंपूज्यावि
प धिवत्पाडिस्यंयतनमुत्तमं॥पुत्रान्योत्रान्त्सुवंकीर्तिंलभतेज
नवश्यतां॥पूजांतेपंचमुद्रेमंत्रीबलिंमंत्रेणदापयेत्॥तारो
मायाश्रीमदेकजटेनीलसरस्वति॥महोग्रतारेदेवालः
सनेत्रैगद्रियुग्मकं॥सर्वभूतपिशाचक्रमोंदीर्घोत्रिमे
बृग्रसं रुता॥गुनमूगुमेममजायेच्छेदयद्विनयंरमा॥मायाश्री चं
त्रिपित्रियांनोसहि पंचाशल्लिपिमंत्रः॥अनेननित्यपूजांतेव
हंदेवैबलिंहरेत्॥एवंसिद्धमनोमंत्रीप्रयोगान्विदधीत

च॥ जातमात्रस्य बालस्य दिवसत्रितयादयः॥ जिह्वायां विलि
खेन्मंत्रं मधुर्ज्यार्ऽर्पशालाकया॥ स्ववर्णकृतया यद्वा मंत्री
मे. यवलहृदयया॥ गतेष्वह्नेषु बालोसौ जायते कविराट् ध्रुवं
श्मशानांगारमानीय शार्वर्यां ऊजवासरे॥ कुसुंबरेण सं
वेष्ट्य तिवहेद्रक्तं तंतुभिः॥ श्मशानाभिजसम्मूलेन निक्षिपेद्वै
रिवेश्मनि॥ उच्चाटयति मन्माहात्म्यकृद्देवाविशोधिनः॥ २
श्रीमन्महोग्रतारायानाम्पेंदोषो विधीयते॥ मंत्रोत्कील
नदोषो वा मंत्रे संजीवनस्य च॥ संपुटस्य विना देवि पुरश्च
रणाकर्मणा॥ गुरुहस्तेन वाऊयीत्साधकस्य करेण वा

ता॰
प॰
९

6

नकदाचिन्नुरुर्वीनखड्गस्सेनवसाधकः॥नतिथिर्नुचनक्ष
त्रंनांगन्यासस्सुमंत्रिणं॥नवारदोषोनोविघ्नोनयमोनिय
मोनच॥साक्षाद्स्तत्रूपंवमेत्राशीघ्रफलप्रदाः॥एकालिं
गेश्मशानेचशून्यागारेचनद्यष्टे॥नत्रस्थःसाधयेद्योगीता
राविभवसान्निणौ॥लक्षत्रयंजपेन्मंत्रंनारिणीयत्रतिष्ठति
निस्पृहःस्थिरचित्तेनस्त्रंजांकृत्वादिशोघतः॥सुगंधस्वेतलो
हितपुष्पमैर्वंचयेद्दलैः॥मधुनापायसंचैवक्षीरमाज्यंच
शर्करं॥बलिंदद्याच्चगोपांवैभक्तिश्चैवविशिष्यते॥बालयौ
स्तस्त्रादेयागुडाम्रकरसेनन॥नक्रंवामसगुडंदद्यात्सर्वका

मार्थसिद्धये॥नारिकेलोदकेकांस्येताम्रेवाविसर्जयेन्मधु॥
सृजनमामनंदिव्यमपरंतर्पणादिकं॥सर्वदैवविभ्रमःका
र्येनाभ्रमेविघ्नेकाचित्॥नविशेषोदिवारात्रौवसंध्यायांवा
महानिशि॥वस्त्रासनस्थानगेहदेहस्पर्शादिवारिणा॥शु
द्धिंनवाचरेत्तत्रनिर्विकल्पमनश्चरेत्॥सर्वदापूजयेद्देवी
सर्वतःकृतभोजनः॥द्विप्रप्रमाददालोकेसदानीलसर
स्वती॥विशेषतःकलियुगेमन्त्रसादोभविष्यति॥सिद्धिंमे
त्रोयथामंत्रीवालिशस्यापिमूर्खतिः॥करंदवादिशत्याश्रु
मोपिसाक्षात्करोत्यतः॥स्वेच्छाचारपरोमंत्रीपरश्चरणसि

ता॰ प॰ ७

हृये॥रहस्यमालामादायलक्षत्रयंसदाजपेत्॥जपाद्द
शांशतोहोमेनतद्दशांशेनतर्पणं॥मार्जनेनतद्दशांशेन
तद्दशांशेनभोजनं॥इतीदंपटलंगोप्यंत्रयमांगसहेश्व
रि॥सारंनीलसरस्वत्याराहिणीयंस्वयोनिवत्॥गुप्तंगुह्यं
गोपनीयंगोप्तव्यंपशुसंकटे॥इदंगुह्यतमंदेविनवक्त्र
ह्मप्रकाशितम्॥॥इतिश्रीरुद्रयामलेतंत्रेमहोग्रता
रापटलःसमाप्तंशुभमम्॥

ता॰ पृ॰ १

ॐ श्रीगणेशाय नमः॥ ॐ नमो तारा भगवत्यै नमः॥ ॐ श्री भैरव उवाच॥ अधुना पद्धतिं वक्ष्ये श्रीताराचनसंयुतां॥ गद्यपद्यमयीं गोप्यां सकलागमनिश्चितां॥ प्रातः कृत्यमकृत्वा तु यो देवीं भक्तितोर्चयेत्॥ न स्यात्पूजा तु विफला शीघ्रो वह्नीनां यथा क्रिया॥ प्रातः शिरसि शुक्लाब्जे द्विनेत्रं द्विभुजं गुरुं॥ वराभयकरं शान्तं स्मरेत्तन्नामपूर्वकं॥ ॐ ब्राह्मे मुहूर्ते शयनतलादुत्थाय करचरणौ प्रक्षाल्य निजासने समुपविश्य॥ निजशिरसि श्वेतवर्णायोमुखसहस्रदलकमलकर्णि

कांतगीतचंद्रमंडलसिंहासनोपरि॥ निषण्णं स्वगुरुं शु
क्लवर्णं शुक्लालंकारभूषितं ज्ञानानंदमुदितमान
सं सच्चिदानंदविग्रहं॥ त्रिनयनं चतुर्भुजं ज्ञानमुद्रा
पुस्तकवराभयकरं॥ वामांगे वामहस्तलसत्कमल
यारक्तवसनाभरणया स्वशक्त्या दक्षिणभुजेनालिं
गितं॥ सर्वदेवादिदेवं सर्वतीर्थतीर्थं परमशिवस्व
रूपं शांतं स्वप्रसन्नं ध्यात्वा॥ तच्चरणकमलयुगलवि
गलदमृतधारया स्वात्मानं स्नातं विभाव्य॥ मानसोप
चारैराराधयेद्यथा॥ लं पृथिव्यात्मकं॥ गंधं॥ समर्पया

ता॰ पू॰ २

मिनमः॥हंआकाशात्मकं॥पुष्पं॥समर्पयामिनमः॥यंवा
य्वात्मकं॥धूपं॥समर्पयामिनमः॥रंवह्न्यात्मकं॥दीपं॥स
मर्पयामिनमः॥वंअमृतात्मकं॥नानानैवेद्यं॥समर्पया
मिनमः॥संसर्वात्मकंफलमूलादिकं॥समर्पयामिन
मः॥ततःश्रीगुरुपादुकांदशधास्मृत्वा॥प्रणमेन्मंत्रा
न्पठेद्यथा॥ओंनमामिसद्गुरुंशांतंप्रत्यक्षंशिवरूपि
णे॥शिरसायोगपीठस्थंमुक्तिकामार्थसिद्धये॥१॥श्री
गुरुंपरमानंदंवंदाम्यानंदविग्रहं॥यस्यसान्निध्यमा
त्रेणचिदानंदायतेपरं॥२॥अखंडमंडलाकारंव्याप्तंये

नचराचरं॥ तत्पदंदर्शितंयेनतस्मैश्रीगुरवेनमः॥३॥
अज्ञानतिमिरांधस्यज्ञानांजनशलाकया॥चक्षुरुन्मी
लितंयेनतस्मैश्रीगुरवेनमः॥४॥गुरुर्ब्रह्मागुरुर्वि
ष्णुःगुरुःसाक्षान्महेश्वरः॥गुरुरेवजगत्सर्वंतस्मैश्री
गुरवेनमः॥५॥नमस्तेनाथभगवन्शिवायगुरुरू
पिणे॥विद्यावतारसंसिद्ध्यैस्वीकृतानेकविग्रह॥६॥न
वायनवरूपायपरमार्थैकरूपिणे॥सर्वाज्ञानतमो
भेदभानवेचिद्घनायते॥७॥स्वतंत्रायदयाक्लृप्तविग्र
हायपरात्मने॥परतंत्रायभक्तानांभव्यानांभव्यरूपि

ता॰ पू॰ २

णे॥ विवेकिनां विवेकाय विमर्शाय विमर्शिनां॥ प्रका
शिनां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे॥ ९॥ पुरस्तात्पा
र्श्वयोः पृष्ठे नमस्कुर्यामुपर्यधः॥ सदा मच्चित्तरूपेण वि
धेहि भवदासनं॥ १०॥ इति गुरुं प्रणम्य॥ स्वप्रसन्नं विभाव्य
मनसानन्दाज्ञां गृहीत्वा॥ मूलाधारे स्वर्णवर्णचतुर्दल
कमलकर्णिकांतर्गतत्रिकोणपीठोपरि परां शक्तिं कुं
डलिनीमुद्यद्दिनकरसहस्रभास्वरां विद्युत्कोटिसन्नि
भां॥ पंचाशद्वर्णविग्रहां महात्रिंशत्कलारूपिणीं॥ त्रिधा
मधामानं सर्पाकारां सार्धत्रिवलयां मूर्धमुखीं विसतं

3

तुननीयसौ सुसंविभाव्य ॥ श्रीगुरूपदिष्टमार्गेणानि
जसहजनादेन सचैतन्यां विधाय ॥ तत्र च तद्दलेषु
वंशंषंसं ॥ **इति पत्रेषु मध्ये मूलेन च संपूज्य** ॥ ततः स्वा
धिष्ठाने विद्रुमवर्णे षड्दलकमले तां नीत्वा ॥ तत्र ॥ बं
भंमंयंरंलं ॥ **इति पत्रेषु मध्ये मूलेन च संपूज्य** ॥ ततः मणि
पूरके नाभौ नीलवर्णे दशदलकमले तां नीत्वा ॥ तत्र
डंढंणंतंथंदंधंनंपंफं ॥ **इति पत्रेषु मध्ये मूलेन च संपू
ज्य** ॥ ततः अनाहते पिंगलवर्णे द्वादशदलकमले
तां नीत्वा ॥ तत्र ॥ कंखंगंघंङंचंछंजंझंञंटंठं ॥ **इति प**

पं॰ तां॰ ष

५

त्रेषुमध्येमूलेनचसंपूज्य॥ततोविशुद्धौकंठेधूम्रवर्णे॥षो
डशदलकमलेतांनीत्वा॥अंआंइंईंउंऊंऋंॠंलृंॡंएंऐं
ओंऔंअंअः॥इतिपत्रेषुमध्येमूलेनचसंपूज्य॥ततऽज्ञा
चक्रेभ्रूमध्येविद्युद्वर्णेद्विदलकमलेतांनीत्वा॥तत्र॥
हंनमः॥क्षंनमः॥इतिपत्रयोर्मध्येमूलेनचसंपूज्य॥त
तोबिंदुरूपेतेजोमयपरमशिवेनसहैकतांनीत्वा॥
तत्रनादश्रवणतत्परोमुहूर्तंलयंविभाव्य॥ततोव
रोहंसोहमितिमंत्रेणकमलात्कमलंमवारोह्य॥मा
नांश्चाज्ञाचक्रादिक्रमेणनेत्रनेत्रकमलेषुनेत्रैरत्नैरेः

मारोह्य

न्नजडशीनत्र

संस्वरूप॥ मानांतनंतदायादनंतज्ञानंदपिदेवताः संतर्प
यंती मूलाधारे स्थापयेत्॥ इत्यारोहावरोहक्रमेणप
रांशक्तिं कुंडलिनीं ध्यात्वा॥ ॐ प्रकाशमानां प्रथमे प्रया
णे प्रतिप्रयाणेप्यमृतायमानां॥ अंतःपदव्यामनुसंच
रंतीमानंदरूपामबलां प्रपद्ये॥ नाहमस्मि न चान्यो
स्मि ध्येयं चात्र न विद्यते॥ आनंदपदसंलीनं मनः स
मरसीगतं॥ अहं देवी न चान्योस्मि ब्रह्मैवाहं न शोक
भाक्॥ सच्चिदानंदरूपोहं स्वात्मानमिति चिंतयेत्॥ त
तो मूलादिब्रह्मरंध्रांतं मूलविद्यामयदिनकरसह

स्वभास्वरं ॥ तेजोमयीमखंडं ध्यात्वा ॥ तत्तेजसा व्याप्तं स्व
देहं विचिंत्य ॥ तत्तेजसा परिणतां श्रीपरदेवतां श्रीतारा
भगवतीं शवासनां ध्यात्वा ॥ मानसोपचारैः संपूज्य ॥ मू
लेन प्राणायामऋष्यादिकरषडंगन्यासान्विदधीतय
था ॥ अस्य श्रीताराभगवतीमंत्रस्य ॥ अक्षोभ्यऋषिः ॥ बृह
तीछंदः ॥ श्रीताराभगवतीदेवता ॥ हूं बीजं ॥ फट् शक्तिः
स्त्रीं कीलकं ॥ जपे विनियोगः ॥ सर्वांगेषु ॥ अथ ऋष्यादि
न्यासः ॥ अक्षोभ्यऋषये नमः ॥ शिरसि ॥ बृहतीछंदसे न
मो ॥ मुखे ॥ श्रीताराभगवतीदेवतायै नमो ॥ हृदि ॥

हूं बीजाय नमः ॥ गुह्ये ॥ फट् शक्तये नमः ॥ पादयोः ॥ स्त्रीं
कीलकाय नमः ॥ नाभौ ॥ जपे विनियोगः ॥ सर्वाङ्गे
षु ॥ इति ऋष्यादिन्यासः ॥ अथ करन्यासः ॥ ॐ ह्रां अंगुष्ठा
भ्यां नमः ॥ ह्रीं तर्जनीभ्यां स्वाहा ॥ हूं मध्यमाभ्यां वष
ट् ॥ ह्रैं अनामिकाभ्यां हुम् ॥ ह्रौं कनिष्ठिकाभ्यां वौष
ट् ॥ ह्रः करतलकरपृष्ठाभ्यां फट् ॥ इति ऋष्यादिन्यासः
अथ हृदयादिन्यासः ॥ ॐ ह्रां हृदयाय नमः ॥ ह्रीं शि
रसे स्वाहा ॥ हूं शिखायै वषट् ॥ ह्रैं कवचाय हुम् ॥
ह्रौं नेत्रत्रयाय वौषट् ॥ ह्रः अस्त्राय फट् ॥ इति हृद

ता॰ पू॰ ९

यादिन्यासः ॥ अथ ध्यानम् ॥ ॐ प्रत्यालीढपदां घोरां मुंड
मालाविभूषितां ॥ खर्वां लंबोदरीं भीमां व्याघ्रचर्मवृतां
कटौ ॥ नवयौवनसंपन्नां पंचमुद्राविभूषितां ॥ चतुर्भु
जां लोलजिह्वां महाभीमां वरप्रदां ॥ खड्गकर्त्रयुतां स
व्ये वामे मुंडोत्पलान्वितां ॥ बालार्कमंडलाकारां लोच
नत्रयभूषितां ॥ पिंगोग्रैकजटां ध्यायेन्मौलावक्षोभ्य
भूषितां ॥ नीलनागजटाजूटां श्वेतनाहिकृतकुंडलां ॥ पी
ताहिकृतं कौपीनां धूम्राहिबद्धभूषणां ॥ श्यामनागो
पवीतां चस्वभ्रादिहारभूषणां ॥ श्वेतनागलसत्कांची

पाटलाहिपदद्वयां ॥ पार्श्वद्वये लंबमानां नीलेंदीवरमा
लिकां ॥ प्रज्वलत्पिंडमध्यास्थितां दंष्ट्राकरालिनीं ॥ प्रा
वकंठपदद्वंद्ववामदक्षपदद्वयां ॥ मांचैव स्मेरवदनां भ
क्तानामभयप्रदां ॥ ॐ श्रीमदुग्रतारायै विद्महे ॥ नीलस
रस्वत्यै धीमहि ॥ तन्नस्तारा प्रचोदयात् ॥ एवं हृदयेंबुजे हृद
यकमले ध्यात्वा तारां संपूज्य ॥ साधकः ॥ मानसैरुपचा
रैस्तु लभेत्सिद्धिमनुत्तमां ॥ इति स्वहृदयकमले स्वाभेदेन
तारादेवीं ध्यात्वा ॥ मंत्रसंस्कारे कुर्याद्यथा ॥ ह्रीं स्त्रीं हूं ॥ उ
त्तिमूर्ध्नि जलकां ॥ १ ॥ ॐ इति मंत्रहृदि ॥ १ ॥ हूं इति महा

ता॰ पू॰ ७

मेतं विशुद्धौ सहस्रारे व॥ ॥ॐ भ्रं मूलं॥ पंभ्रंशा मित्या
दिना मानुच्चार्य॥ ॐ इति निर्वाणं मणिपूरके दशधा॥
इत्येतान्संस्कारान्कृत्वा॥ मंत्र संस्कारान्कुर्यात्॥ यथा
स्त्रीं ह्रीं ऊं फट् क्लीं॥ इत्युत्कीलनं त्रिः॥ ह्रीं स्त्रीं ऊं फट् क्रीं
क्लीं इति संजीवनं त्रिः॥ ॐ स्त्रीं ऊं ब्रह्मशापं मोचय मो
चय स्वाहा॥ इति शापहारी॥ ७॥ ॐ मूलं ॐ इति॥ ७॥ सद्यो
जातमंत्रे दशधा जप्त्वा॥ ॐ माले माले महामाले सर्व
तत्त्वस्वरूपिणि॥ चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धि
दा भव॥ इत्यादि पठित्वा॥ मनसा मालां संपूज्य॥ गमविघ्नं

र्कुरु माले त्वं राजतः शत्रुतोपि वा ॥ सर्वस्माद्विघ्नसंघा
तादह्न मां परमेश्वरि ॥ इति दक्षकरेण मालां गृहीत्वा ॥
क्लीं ह्रीं स्त्रीं हुं फट् ॥ इति मूलमंत्रः ॥ स्मरन्यथा शक्ति ज
पं विधाय ॥ जपांते त्वं माले सर्वदेवानां प्रीतिदा शुभ
दा मता ॥ शुभं कुरु मे भद्रे यशो वीर्यं च सर्वदा ॥ इत्या
दि पठन् शिरसि मालां संस्थाप्य ॥ पुनरपि ऋष्यादिक
रषडंगानि विधाय ॥ फट् क्लीं ह्रीं स्त्रीं हुं इति संपुटं त्रिः ॥
गुह्येति योन्या प्रणमेत् ॥ प्रातः प्रभृति सायांते साया
दिशांतरं ततः ॥ यत्करोमि जगन्मातस्तदस्तु तव पूज

ता॰ नं॥इत्यादि पठित्वा॥अद्यपूर्वेद्युरहोरात्राचरितमुच्छ्वास
सू॰ निःश्वासात्मकं॥षट्‌शतानाधिकमेकविंशतिसहस्रसं
प ख्याकमजपाजपं॥मूलाधारस्वाधिष्ठानमणिपूरका
नाहतविशुद्धाज्ञाचक्रब्रह्मरंध्रेषु॥स्वर्णविद्रुमनील
8 पिंगलधूम्रकर्बुरश्वेतवर्णेषु॥स्थितेभ्यो गणपतिब्र
ह्मविष्णुरुद्रजीवात्मपरमात्मगुरुपादुकाभ्यो यथा॥
भागशः समर्पयिष्यामि॥अद्यपूर्वेद्युरहोरात्राचरित
मेकविंशतिसहस्रसंख्याकं षट्‌शतानाधिकमजपाज
पमहं करिष्ये॥इति संकल्प्य॥ॐ ऐं ह्रीं श्रीं मूलाधारच

कस्यायगणपतयेश्रजपाजपानोंबट्
शतानिसमर्पयामिनमः॥ ॐऐंह्रींश्रीं
स्वाधिष्ठानचक्रस्यायब्रह्मणेश्रजपाज
पानोंबट्सहस्त्राणिसमर्पयामिनमः॥
८...॥ॐऐंह्रींश्रींमणिपूरकचक्रस्यायवि
ष्णवेश्रजपाजपानोंबट्सहस्त्राणिसमर्प

ता यामिनमः॥८॥ ॐपैंह्रींश्रींअनाहतचक्रस्थायरु
द्राययअजपाजपानांद्वसहस्राणिसमर्पयामि
नमः॥८॥ ॐपैंह्रींश्रींविशुद्धचक्रस्थायजीवा
त्मनेअजपाजपानांसहस्रंसमर्पयामिनमः
९॥ ॐपैंह्रींश्रींआज्ञाचक्रस्थायपरमात्मनेअजपा
जपानांसहस्रंसमर्पयामिनमः॥ षं सहस्रदल

पू॰ ९

9

कमलमध्यवर्त्तिन्यै श्रीगुरुपादुकायै अजपाजपा
नां सहस्रं समर्पयामि नमः ॥ इतिसमर्प्य अजपामंत्रे
णप्राणायामं विधाय ॥ अस्य श्री अजपा गायत्री मंत्रस्य ॥ हं
स ऋषिः ॥ अव्यक्ता गायत्री छंदः ॥ परमहंसो देवता ॥ हं
बीजम् ॥ सः शक्तिः ॥ सोहं कीलकं ॥ उदात्त स्वरः ॥ हेमो
वर्णः ॥ नभः स्थाने ॥ मम मोक्षार्थे जपे विनियोगः ॥
अथ ऋष्यादिन्यासः ॥ हंस ऋषये नमः ॥ शिरसि ॥ अव्य
क्ता गायत्री छंदसे नमो ॥ मुखे ॥ परमहंसो देवतायै
नमः ॥ हृदि ॥ हं बीजाय नमो ॥ गुह्ये ॥ सः शक्तये नमः

पादयोः॥ सोहंकीलकायनमो॥ नाभौ॥ उदात्तःस्वराय
नमः॥ हृदये॥ ह्रौं मोवर्णायनमः॥ कंठे॥ नमःस्थानाय
नमो॥ मूर्ध्नि॥ ममेमोक्षार्थेजपेविनियोगः॥ सर्वांगेषु
इतिऋष्यादिन्यासः॥ अथकरन्यासः॥ ॐ ह्रां सूर्यात्मने
स्वाहाअंगुष्ठाभ्यांनमः॥ ह्रीं सोमात्मनेस्वाहातर्जनी
भ्यांस्वाहा॥ ह्रूं निरंजनात्मनेस्वाहामध्यमाभ्यांवष
ट्॥ ह्रैं निराभासात्मनेस्वाहाअनामिकाभ्यांहुम्॥ ह्रौं
अनंततनुसूक्ष्मादेवीप्रचोदयात्स्वाहाकनिष्ठिका
भ्यांवौषट्॥ ह्रः अव्यक्तबोधात्मनेस्वाहाकरतलक

रहस्त्रांभ्रांफट्॥ इति करन्यासः॥ अथ हृदयादिन्यासः॥
ॐ ह्रां सूर्यात्मने स्वाहा हृदयाय नमः ह्रीं सोमात्मने
स्वाहा शिरसे स्वाहा॥ ह्रूं निरंजनात्मने स्वाहा शिखा
यै वषट्॥ ह्रैं निराभासात्मने स्वाहा कवचाय हुम्॥ ह्रौं
अनंतनंतुसूक्ष्मादेवीप्रचोदयात्स्वाहा नेत्रत्रयाय वौ
षट्॥ ह्रः अव्यक्तबोधात्मने स्वाहा अस्त्राय फट्॥ इति हृद
यादिन्यासः॥ ततो ध्यायेत्॥ ॐ यां मूर्धानं यस्य विप्रा वदं
ति खं वै नाभिं चंद्रसूर्यौ च नेत्रे॥ दिग्भिः श्रोत्रे यस्य पादौ
क्षितिश्च ध्यातव्योसौ सर्वभूतांतरात्मा॥ इति विराट्स्व

ता॰
सू॰
११

रूपं स्वात्मानं ध्यात्वा ॥ नदन्तुसंधायी प्राणवायोर्निर्गमप्रवे
शात्मकं सोहमिति मंत्रं पंचविंशतिवारं जप्त्वा समर्प्य ॥
ॐ गमागमस्थं गमनादिशून्यं सच्चित्प्रकाशं तिमिरांतय
कारं ॥ पश्याम्यहं सर्वजगत्स्वथानेन नमाम्यहं हंसं परमात्म
रूपं ॥ चिदानंदस्वरूपासि योगरहाणादौ जपं स्वयं ॥ संसिद्धिं स
च्चिदानंदे सच्चिदानंदमर्पये ॥ ॐ समुद्रमेखले देवि पर्व
तस्तनमंडले ॥ विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे
इति भूमिं प्रार्थ्य ॥ श्वासानुसारेण तस्या पादं निधाय ॥ दंत
धावनं कुर्याद्यथा ॥ मूले दंतकाष्ठं प्रक्षाल्य ॥ क्लीं कामदे

वायसर्वजनप्रियायनमः ॥ इतिदंतधावनंविधाय ॥ जि
ह्वामुल्लिख्य ॥ दंतकाष्टंप्रक्षालितं पुरःशुद्धदेशेनिक्षि
पेत् ॥ ततोनद्यादौकुशमृदादिकंगृहीत्वागत्वा ॥ तत्रैव
वैदिकस्नानंनिर्वर्त्य ॥ तांत्रिकंमारभेतयथा ॥ तत्रादौ
मूलेनकरचरणौमुखंप्रक्षाल्य ॥ ॐमणिधरिफनिव ११
ज्रिणिमहाप्रतिसरेरक्षरक्षहुंफट्स्वाहा ॥ इतिशिखा
वद्धाचमनत्रयंकुर्यात् ॥ यथा ॥ मूलंआत्मतत्वंशोधया
मिस्वाहा ॥ इत्यादि ॥ अथवामूलं ॥ तारायैनमःस्वाहा ॥ मू
लं ॥ उग्रतारायैनमःस्वाहा ॥ मूलं ॥ एकजटायैनमःस्वा

ना॰ हा ॥ इत्याचम्य ॥ ह्रीं इति हस्तौ प्रक्षाल्य ॥ ह्रीं ह्रं इति द्विरोष्ठा
पू॰ वुन्मृज्य ॥ फडिति करौ प्रक्षाल्य ॥ ॐ वैरोचनाय नमः ॥ इ
१२ त्याचम्य संस्पृशेत् ॥ ॐ अमिताय नमः ॥ इति ऽनामिकाग्र
हृदये संस्पृशेत् ॥ ॐ पद्मनाभाय नमः ॥ इत्यो ऽक्षणी संस्पृशे
12 त् ॥ ॐ शंखपांडुराय नमः ॥ इति श्रोत्रे संस्पृशेत् ॥ ॐ त्वाम
काय नमः ॥ ॐ कामकाय नमः ॥ इति वक्त्रः संस्पृशेत् ॥ ॐ
पांडुराय नमः ॥ इति शिरसि संस्पृशेत् ॥ ॐ नारकाय नमः
इति भुजौ संस्पृशेत् ॥ अप्यमुपस्पर्शनं कृत्वा ॥ पुनराचम्य
मूलेन मृत्तिकाद्भिः सेचयेत् ॥ इति मृच्छुद्धिः ॥ मूलेन म

लापकर्षणस्नानं विधाय ॥ पुनराचमनप्राणायामं ॥ ऋ
ष्यादिकरषडंगन्यासान्विधाय ॥ संकल्पं कुर्याद्यथा ॥ ॐ
अद्यामुकमासस्यामुकपक्षस्य तिथावमुकायाममु
कवेलेऽमुकशर्माहं ॥ श्रीताराभगवतीप्रीतये तांत्रि
कविधिना स्नानमहं करिष्ये इति संकल्पं कुर्यात् ॥ जले
त्रिकोणचक्रं विलिख्य ॥ ॐ गंगे च यमुने चैव गोदाव
रि सरस्वति ॥ नर्मदे सिंधु कावेरि जलेस्मिन्सन्निधिं कुरु
इति सूर्यमंडलादावाह्य ॥ क्रोमित्यंकुशमुद्रया तीर्थान्या
वाह्य ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानि ते रवे ॥ तेन स

ना॰ पू॰ १३

13

येनमेदेवतीर्थंदेहिदिवाकर॥आवाहयामित्वांदेवि
स्नानार्थमिहसुंदरि॥एहिगंगेनमस्तुभ्यंसर्वतीर्थस
मन्विते॥पुरःकल्पिततीर्थेसंयोज्य॥पुनराचम्य॥मूले
नस्नानमानेसंप्रोक्ष्य॥मूलेनमृत्तिकयास्नपनंविधाय
मूलंपठन्॥स्वहृदयकमलान्मूलदेवींसमुत्थाप्य॥
वामनासयापुरःकल्पिततीर्थेसमावाह्य॥तत्रविधि
वज्ज्ञात्वा॥सकलीकृत्य॥मनसासंपूज्य॥ॐमस्तुद्वयास
देवतामावाहितांत्रिरभिषिच्य॥श्रवणादिसमस्तच्छिद्रा
णिसंरुध्यत्रिर्निमज्योन्मज्जेत्॥मृत्तिकयामूलेनलला

टेत्रिपुड्कंकुर्यात्॥मूलेनवस्त्रजलेनशोधयेत्
ततोमूलेनत्रिर्देवीसंतर्प्य॥स्वस्थानेनयेत्॥इति
स्नानविधिः॥अथसंध्या॥तत्रपूर्ववदाचम्य॥प्राणा
यामऋष्यादिकरषडंगान्विधाय॥पूर्ववत्तीर्थमा
वाह्य॥पुरःकल्पिततीर्थेसंयोज्य॥तेनजलेनतत्त्व
मुद्रया॥ॐऐंह्रींश्रींश्रंनमइत्यादिक्लांनमुच्चार्य॥स
शरीरंमस्तकादिपादांतेसंप्रोक्ष्य॥वामहस्तेजलं
विधाय॥दक्षहस्तेनाच्छादयेत्॥लंवंरंयं॥इतिपंचभौति
कैर्मंत्रैःसप्तवारमभिमंत्र्य॥मूलेनचत्रिरभिमंत्र्य॥त

जलविंदुभिस्तत्वमुद्रया सप्तवारं स्वशिरो मूलेन सं
प्रोक्ष्य ॥ शेषजलं दक्षहस्ते समादाय ॥ तेजोरूपं ध्यात्वा
इडया देहान्तर्नीत्वा ॥ तेन पापं प्रक्षाल्य ॥ कृष्णवर्ण
तज्जलं पापरूपं पिंगलया विरेच्य ॥ स्ववामभागस्थ
वज्रशिलायां ॥ ॐ अस्त्राय फट् ॥ इति निक्षिपेत् ॥ ततो ह
स्तौ प्रक्षाल्य ॥ जलांजलिं गृहीत्वा ॥ ॐ ह्रां ह्रीं हंसः श्री
मार्तंडभैरवाय प्रकाशशक्तिसहिताय इदमर्घ्यं क
ल्पयामि नमः ॥ इति त्रिरर्घ्यं ऊलसूर्याय दत्वा ॥ तत्र वि
धिवद्ध्यात्वा ॥ मूलं ॥ श्रीमुग्रतारायै विद्महे ॥ नीलसर

स्वस्यै धीमहि॥ तन्नस्तारा प्रचोदयात्॥ इत्यनयागाय
त्र्यासूर्यमंडलेश्रीदेव्यैत्रिरर्घ्यंदत्वा॥ चत्र सप्त संध्या
सवनत्रविधिवत्कृत्वा॥ गायत्रीयथाशक्तिजप्त्वा
प्राणायामादिपूर्वकंमूलंयथाशक्तिसंजप्य॥ य
थाशक्तिगायत्रीमपिजप्त्वा॥ पुनरपिप्राणायामा
दिनाशुद्धेति॥ देवीवामहस्तेजपंसमर्प्य॥ सूर्यमं
डलाद्देवींस्वहृदिसमानीयध्यात्वा॥ तीर्थानिविस
र्जयेत्॥ इतिसंध्याविधिः॥ अथतर्पणं॥ तत्रसर्ववदा
चम्य॥ प्राणायामादिविधाय॥ स्वपुरतोजलेतीर्थमा

ता॰ पू॰ १५

वात्व ॥ इति अमृतीकृत्य ॥ मूलेनाष्टधाऽभिमंत्र्य ॥ तत्र
श्रीचक्रे विभाव्य तत्र देवीं हृत्कमलादानीय ॥ मान
सोपचारैः संपूज्य ॥ मूलं ॥ तारे वज्रपुष्पं प्रतीच्छ हूं फ
ट् स्वाहा ॥ तर्पयामि नमः ॥ इति यथाशक्त्या संतर्प्य ॥ यथा
शक्त्याऽवरणदेवताश्च संतर्प्य ॥ मूलदेवीमेव सा
युधसवाहनसपरिकरमावरणश्रीतारे वज्रपु
ष्पं प्रतीच्छ हूं फट् स्वाहा तर्पयामि नमः ॥ इति त्रिः संत
र्प्य ॥ ऐशान्यां श्रीगुरो अमुकानंदनाथ वज्रपुष्पं प्र
तीच्छ हूं फट् स्वाहा तर्पयामि नमः ॥ वक्ष्ये परमगु

रोम्रगुकानंदनाथवज्रगुंफ्रनीकुंफट्स्वाहातर्पयामिनमः॥नैर्रुत्यांपरमाचार्यगुरोश्रीगुरोपर्मगुरोश्रगुकानंदनाथवज्रगुंफ्रनीकुंफट्स्वाहातर्पयामिनमः॥वायव्येश्रीपरमेष्ठिगुरोश्रीपादुकांपूजयामितर्पयामिनमः॥इतित्रिःसकृद्वासंतर्पः॥तीर्थंस्वस्थानेविसृज्य॥प्राणायामादिनासमर्पयेत्॥इतितर्पणं॥ततःउस्थायमौनीमूलंस्मरन्॥ॐवज्रोदकिऊंफट्स्वाहा॥इतिजलंसव्येनानीय॥स्थानमभ्युक्ष्य॥उपविश्यपनत्र॥ॐह्रींस्वविशुद्धयमेगात्रि

ता॰
पू॰
१८

18

सर्वपापानिशमयाशेषविकल्पानपनयहुंफट्॥
स्वाहा॥इतिमंत्रेणहस्तौपादौप्रक्षाल्य॥ॐह्रींस्वाहा॥इत्या
चम्य॥जलादिनाद्वारदेवतापूजयेद्यथा॥गंगणेशा
यनमः॥दक्षे॥क्षंक्षेत्रपालायनमः॥वामे॥द्वांद्वार
श्रियैनमः॥ऊर्ध्वे॥दंदेहल्यैनमः॥अधः॥वास्तुपुरु
षायनमः॥इतिद्वारदेवताःसंपूज्य॥वामांगचलनेनांतः
प्रविश्य॥यागस्थानेविशोधयेद्यथा॥श्मशानेन
त्रसंचिंत्यतत्रकल्पद्रुमंस्मरेत्॥तन्मूलेमणिपी
ठंचनानामणिविभूषितं॥नानालंकारभूषाढ्यं

पुनर्देवैश्च भूषिते ॥ शिवाभिर्बहुमांसास्थिमोदमाना
भिरन्विते ॥ चलद्दिक्षु शवमुंडवितानागारास्थिभूषि
ते ॥ तन्मध्ये भावयेद्देवीं यथोक्तध्यानयोगतः ॥ इति
यागगेहसंशोधनं ॥ विचिंत्य च ॥ ॐ मणिधरि वज्रिणि
महाप्रतिसरे हुं फट् स्वाहा ॥ इति मंत्रेण शिखाबंधनं कृ
त्वा ॥ ॐ रक्ष रक्ष हुं फट् स्वाहा ॥ इति भूमिसंशोधनं ॥ ॐ स
र्वविघ्नानुत्सारय ॥ ॐ पवित्रवज्रभूमे हुं फट् स्वाहा ॥ इ
ति भूमिसंशोधनं ॥ तत्र महायासनं समास्तीर्य ॥ तत्रैक
शानकुशाकृतविष्टरे संस्थाप्य ॥ तत्र प्राणप्रतिष्ठां

ऊर्ध्वान्॥ यथा॥ ॐ आं ह्रीं क्रों मम प्राणा इह प्राणाः॥ ॐ आं
ह्रीं क्रों मम जीव इह जीवः॥ ॐ आं ह्रीं क्रों मम सर्वेन्द्रियाणि इ
ह संस्थितानि॥ ॐ आं ह्रीं क्रों वाङ्मनःश्रोत्रत्वक्चक्षुर्जि
ह्वाघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा॥ इति
स्वासनविग्रहे प्राणप्रतिष्ठां विधाय॥ ॐ अः स्वरे खे वज्ररे
खे हुं फट् स्वाहा॥ इति संपूज्य॥ ह्रीं आधारशक्त्यै कमला
सनाय नमः॥ ॐ आं ह्रीं क्रों मण्डूकाय नमः॥ खें कालाग्नि
रुद्राय नमः॥ खें मूलप्रकृत्यै नमः॥ खें आधारशक्त्यै न
मः॥ खें कूर्माय नमः॥ खें कमठाय नमः॥ खें शेषाय नमः॥

खं पृथिव्यै नमः ॥ खं सुधार्णवाय नमः ॥ खं मणिद्वीपाय
नमः ॥ खं चिंतामणिगृहाय नमः ॥ खं रत्नवेदिकायै नमः
खं श्मशानाय नमः ॥ खं कल्पवृक्षाय नमः ॥ खं मणिपीठा
य नमः ॥ खं नानामणिविभूषितनानालंकारभूषाढ्य
नानामुनिगणेभ्यो नमः ॥ खं नानादेवेभ्यो नमः ॥ खं बुड
मांसास्थिमोदनाभ्यो नमः ॥ खं शिवाभ्यो नमः ॥ चतुर्दिक्षु
शवमुंडचितांगारास्थिभ्यो नमः ॥ इत्यासनं संपूज्य ॥ ॐ अ
स्य श्रीआसनशोधनमंत्रस्य ॥ मेरुपृष्ठऋषिः ॥ सुतलं छं
दः ॥ कूर्मो देवता ॥ श्रीं बीजं ॥ ह्रीं शक्तिः ॥ क्लीं कीलकं ॥ आ

ना· सनशोधनेविनियोगः॥ अथऋष्यादिन्यासः॥ मेरुपृष्ठ
सू· ऋषिभ्योनमः॥ शिरसि॥ सुतलेछंदसेनमो॥ मुखे॥
१५ कूर्मोदेवतायैनमः॥ हृदि॥ आंबीजायनमो॥ गुह्ये॥ ह्रीं
शक्तयेनमो॥ नाभौ॥ क्रौंकीलकायैनमः॥ पादयोः॥
18 आसनशोधनेविनियोगः॥ सर्वांगेषु॥ ॐ आं अंगुष्ठा
भ्यांनमः॥ ह्रींतर्जनीभ्यांस्वाहा॥ क्रैंमध्यमाभ्यांवषट्॥ अथकरन्यासः
ॐ आंअनामिकाभ्यांहुं॥ ह्रींकनिष्ठकाभ्यांवौषट्॥ क्रौं
करतलकरपृष्ठाभ्यांफट्॥ इतिकरन्यासः॥ अथहृदयादि
न्यासः॥ पृथ्वित्वयाधृतालोकादेवित्वंविष्णुनाधृता॥

त्वंचधारयमांदेविपवित्रंकुरुचासनं ॥ इतिभूमिंप्रार्थ्य ॥
पद्मासनेवीरायन्यतमासनेनोपविश्य ॥ ॐ मणि
धरिवज्रिणिमहाप्रतिसरेरक्षरक्षहुंफट्स्वाहा ॥ इति
मन्त्रेणवस्त्रग्रन्थिंकृत्वा ॥ ॐ आःसुरेरेखेवज्ररेखेहुंफट्स्वा
हा ॥ इतिकायवाक्चित्तानि संशोध्य ॥ ॐ शुद्धकेतुराजा
धीशानाय ॥ समस्तलोकावहाय ॥ हुंशुद्धेशुद्धेमहाशु
द्धेसुशुद्धेशुद्धसंभवे ॥ शुद्धस्वचयावकीर्णेहुंफट्स्वा
हा ॥ ॐ शानाभिषेकेशानाभिषेकेहुंफट्स्वाहा ॥ इतिशुद्धा
णिसंशोध्य ॥ संविदेयथामेत्रस्त्रीकुर्यात् ॥ यथा ॥ ॐ

संविदेवलसंभूतेवलवृद्धिप्रदानवे॥भैरवानांचवत्स
ल्यर्थंपवित्राभवसर्वदा॥ॐब्राह्मयैनमःस्वाहा॥ॐ
सिद्धमूलत्रयेदेविह्रीनेवोयप्रवोधिनि॥राजप्रजा
वशंकरिशत्रुपक्षनिस्तृदिनि॥ऐंद्रियायैनमः॥ॐ
प्रज्ञानेंधनदीमाग्रेज्ञानाग्निवलरूपिणि॥प्राणेदस्ता
हृतिंप्रीतिंसमग्रज्ञानेप्रयच्छमे॥ह्रींवैष्णायैनमः॥
ॐनमस्यामिनमस्यामियोगमार्गप्रदर्शिनि॥त्रैलो
क्याविजयेमातःसमाधिफलदाभव॥क्लींशूद्रायैनमः
इत्यभिमंत्र्य॥ॐस्मरनेस्मरतोद्भवेस्मरनववर्षिणिस्र

स्तनमाकर्षय कर्षय सिद्धिं देहि देहि ॥ श्रीनाथपादेव
श्यमानय आनय स्वाहा ॥ नडपरि मूले च मम थाज
ना ॥ अमृते हृत्पनाथ भगवति इहागच्छ गच्छ ॥ इत्या
वाहनमुद्राः प्रदर्श्य ॥ ततः शिरसि ॥ गुरून्संतर्प्य ॥ हृदि
श्रीदेवीं संतर्प्य ॥ ऐं वद वद वाग्वादिनि मम जिह्वाग्र
स्थिरीभव सर्वसत्ववशंकरि स्वाहा ॥ इत्यनेन मुखे ज
ड्यात् ॥ ततः शिवोऽहमिति भावयन् ॥ श्रीगुरूपदेशावि
धिना श्रीचक्रेश्वरं ततः संस्थाप्य ॥ मूलेन पुष्पांजलिं हि मा
स्वदत्ते गंधपुष्पादिके ॥ वामे शंखपात्रे जलं स्वहस्थे कर

ना॰ पू॰ २१

४०

वक्षालनपात्रे॥ देवतायाः पश्चिमे इक्ष्वाग्नि॥ प्रत्यक्सर्वे
वामे निधाय॥ वामभागस्थं जलकुंभे॥ ह्रां इति वामक
राग्रेण तनस्थं जलं स्पृष्ट्वा॥ ह्रौंः इति दक्षकराग्रेण स्प
ष्ट्वा॥ रमिति दीपशिखां च स्पृष्ट्वा॥ करौ प्रक्षाल्य॥ वाम
कर्णे॥ ऐं गुरुभ्यो नमः॥ दक्षे॥ गं गणपतये नमः॥
मध्ये॥ श्रीजलदेवतायै नमः॥ मूर्ध्नि॥ श्रीगुरुपादुकां
च विन्यस्य॥ पुनरनयैव विधया गंधादिना संपूज्य॥
गंधादि पंचमुद्राः प्रदर्श्य॥ वामपार्ष्णिघातत्रयं भूमौ
दत्वा॥ ऊर्ध्वोर्ध्वतालत्रयेण दशदिग्बंधनं कृत्वा॥ दिव्य

दृष्ट्वा विघ्नान्निरस्य ॥ त्रिशूलाकारयोः ॥ व्यस्तयोः कर
योः ॥ स्वमूर्धानेपुरनास्त्रिभ्रामणेन वह्निदिग्वह्नि
प्राकारत्रयं च कृत्वा ॥ प्राणायामत्रयं च कृत्वा ॥ भू
तशुद्धिं कुर्यात् ॥ यथा ॥ तत्रादावुत्तानौ करौ कृत्वा ॥
हंसइतिमंत्रेण मूलाधारात्कुंडलिनीं ॥ पृथिव्या
सह स्वाधिष्ठानेन सह मणिपूरे समानीय ॥ तत्र व
ह्नौ जलं लीनं विचिंत्य ॥ तस्माद्वह्निना सहानाह
ते समानीय ॥ तत्र वायौ वह्निं लीनं विचिंत्य ॥ तस्मा
द्वायुना सह विशुद्धे समानीय ॥ तत्राकाशे वा

त्रा॰ पुंलीनेविचिंत्य॥तस्मादाकाशेनसहाज्ञाचक्रेसमा
सू॰ नीय॥तत्रस्थोमनसाकाशेलीनेसंचिंत्य॥मनोनादे
३१ लीनेविभाव्य॥ध्यनैश्वनिसमर्प्य॥सहस्रदलकम
लकर्णिकास्थचंद्रमंडलमध्य॥त्रिकोणेनगतेने
जोमयबिंदुरूपपरमशिवेनसमर्प्य॥प्राणाया
मविधिना॥यमितिबीजंधूम्रवर्णंषोडशवारंज
२ पक्षारीरेशुष्कपणीत्मकेपापपुरुषंकज्जलप्रभं॥
ब्रह्महत्याशिरस्कंचस्वर्णस्तेयभुजहृदयं॥सुरापा
नलिंगयुक्तंगुरुतल्पकटिद्वयं॥तत्संसर्गिपदद्वं

हमंगप्रत्यंगपातकं॥उपपातकरोमाणंरक्तश्म
श्रुविलोचनं॥खड्गचर्मधरंक्रुद्धंपापंकुक्षौविचिं
तयेत्॥इतिपापपुरुषंविचिन्त्य॥यंशोष्यवह्नीइतिबी
जे॥रक्तवर्णेनाभौध्यात्वा॥तज्जातवह्निनाशुष्कप
र्णात्मपापपुरुषंकज्जलप्रभं॥संदह्य॥सौकारं
पीतवर्णंहृदिविचिंत्य॥तदुद्भूतेनमहावायुना
भस्मप्रोत्सार्य॥रेचकेन॥ठंकारंश्वेतवर्णंशिरसिवि
चिंत्य॥तदुद्भूतेनअमृतेनतद्भस्मप्लावितंकृत्वा॥
समस्तमपगातव्यथंविस्मयंशरीरमाप्लावयेत्

ना॰ पू॰ २२

नतस्रात्मानंदेवतामयंनिर्मलंध्यायेत् ॥ इत्थंभूतशु
द्धिंविधाय ॥ अःकारादर्कपंकजं ॥ तदुपरिटंकारा
ख्येनपंकजं ॥ तदुपरिनीलसन्निभं ॥ इंकारंध्यात्वा ॥
हूंबीजमस्थितंनाकर्तंकांध्यायेत् ॥ तदुपरिआत्मानं
नारिणीमयंध्यायेत् ॥ इतिभूतशुद्धिः ॥ अथप्राणप्रति
ष्ठा ॥ ॐआंह्रींक्रोंयंरंलंवंशंषंसंहंहंसःसोहंश्रीना
रायणस्यप्राणाइहप्राणाः ॥ ऐं ॥ जीवइहस्थितः ॥ ऐं ॥ स
र्वेन्द्रियाणिइहस्थितानि ॥ ऐं ॥ वाङ्मनश्श्रोत्रत्वक्च
क्षुर्जिह्वाघ्राणप्राणाइहागमसुखंचिरंतिष्ठंतुस्वा

हा॥ इति श्रीतारा प्रतिष्ठाविधायः॥ ऋष्यादिस्मरणं विदधीनयथा॥ ॐ अस्य श्रीताराभगवतीमंत्रराजस्य॥ श्रीअक्षोभ्यऋषिः॥ बृहतीछंदः॥ श्रीताराभगवतीदेवता॥ ह्रींबीजं॥ फट्शक्तिः॥ ह्रींकीलकं॥ श्रीधर्मार्थकाममोक्षार्थे जपे विनियोगः॥ अथ ऋष्यादिन्यासः॥ श्रीअक्षोभ्यऋषये नमः॥ शिरसि॥ बृहतीछंदसे नमो॥ मुखे॥ श्रीताराभगवतीदेवतायै नमो॥ हृदि॥ ह्रींबीजाय नमो॥ नाभौ॥ फट्शक्तये नमो॥ ह्रींकीलकाय नमः॥ पादयोः॥ श्रीधर्मार्थका

गुह्ये

ता॰ सू॰ २३ ममोद्धार्थे जपे विनियोगः ॥ सर्वांगेषु ॥ इति ऋष्यादि
न्यासः ॥ अथ करन्यासः ॥ ह्रां अंगुष्ठाभ्यां नमः ॥ ह्रीं तर्ज
नीभ्यां स्वाहा ॥ ह्रूं मध्यमाभ्यां वषट् ॥ ह्रैं अनामिका
भ्यां हुम् ॥ ह्रौं कनिष्ठिकाभ्यां वौषट् ॥ ह्रः करतलकर
पृष्ठाभ्यां फट् ॥ इति करन्यासः ॥ अथ हृदयादिन्यासः ॥ ह्रां
हृदयाय नमः ॥ ह्रीं शिरसे स्वाहा ॥ ह्रूं शिखायै व
षट् ॥ ह्रैं कवचाय हुम् ॥ ह्रौं नेत्रत्रयाय वौषट् ॥ ह्रः
[illegible] अस्त्राय फट् ॥ इति हृदयादिन्यासः ॥ अथांत
र्मातृकान्यासः ॥ तत्रादौ स्वरैः सरकः कादिमांतैः कं

23

भकः यादिभिरेचकः ॥ ओं अस्य श्रीअंतर्मातृकान्या
सस्य ॥ श्रीब्रह्माऋषिः ॥ गायत्रेछंदः ॥ श्रीमातृका
सरस्वतीदेवता ॥ हल्भ्योबीजानि ॥ स्वराःशक्तयः
अव्यक्तंकीलकं ॥ ममश्रीनारंगत्वेनन्यासेविनि
योगः ॥ अथऋष्यादिन्यासः ॥ श्रीब्रह्माऋषयेनमः ॥
शिरसि ॥ गायत्रेछंदसेनमो ॥ मुखे ॥ श्रीमातृका
सरस्वतीदेवतायैनमः ॥ हृदि ॥ हल्भ्योबीजायन
मो ॥ नाभौ ॥ स्वराःशक्तयेनमः ॥ गुह्ये ॥ अव्यक्तकी
लकायैनमः ॥ पादयोः ॥ ममश्रीनारंगत्वेनन्यासे

ना॰
सू॰
२४

७५

विनियोगः॥ सर्वांगेषु॥ इति ऋष्यादिन्यासः॥ अथ कर
न्यासः॥ ॐ ऐं ह्रीं श्रीं अं कं खं गं घं ङं आं अंगुष्ठाभ्यां न
मः॥ ॐ ऐं ह्रीं श्रीं इं चं छं जं झं ञं ईं तर्जनीभ्यां स्वाहा॥
ॐ ऐं ह्रीं श्रीं उं टं ठं डं ढं णं ऊं मध्यमाभ्यां वषट्॥ ॐ ऐं
ह्रीं श्रीं एं तं थं दं धं नं ऐं अनामिकाभ्यां हुम्॥ ॐ ऐं ह्रीं
श्रीं ओं पं फं बं भं मं औं कनिष्ठिकाभ्यां वौषट्॥ ॐ ऐं ह्रीं
श्रीं करतलकरपृष्ठाभ्यां फट्॥ इति करन्यासः॥ अथ हृ
दयादिन्यासः॥ ॐ ऐं ह्रीं श्रीं अं कं खं गं घं ङं आं हृदया
य नमः॥ ॐ ऐं ह्रीं श्रीं इं चं छं जं झं ञं ईं शिरसि स्वाहा

अंयंरंलंवंशंषंसं
हंळं:क्षं:॥

ॐ पें ह्रीं श्रीं डं टं ठं डं ढं णं ऊं शिखायै वषट् ॥ ॐ पें
ह्रीं श्रीं पं तं थं दं धं नं पें कवचाय हुम् ॥ ॐ पें ह्रीं श्रीं
ॐ पं फं बं भं मं ॐ नेत्रत्रयाय वौषट् ॥ ॐ पें ह्रीं श्रीं
यं रं लं वं शं षं सं हं ळं क्षः अः अस्त्राय फट् ॥ इति रुद्रया
दिन्यासः ॥ ततो ध्यानम् ॥ ॐ व्योमें डौं रसनाणिकणि
कमचांहेहैः स्फुरत्केसरं ॥ पद्मानगैन पंचवर्गाय
शालाणींदिविवर्गक्रमान् ॥ प्राणस्वस्तिपुलोन
लोगलिपुटाहोणीपुरेणा हनंवर्णाब्धिशीरसि
स्थिनंविषगादपद्मं मस्त्संजयं ॥ ॥ मूलायारश

ता॰
पू॰
२५
25

तिंशुत्वामब्रह्मशाशिकुंडली॥ज्वलत्पावकसंकाशं
सूक्ष्मतेजःस्वरूपिणी॥४॥मूलाधारंछिरःपद्मंस्पृशे
नींविद्युदाकृतिं॥तयास्पृष्टशिरःपश्चादमृतेनोपवृष्ट
पिणः॥५॥निर्गतान्मातृकावर्णान्स्वशुभ्राभावत्मेना
नतं॥व्यापयित्वास्थितान्सर्वानेवंध्यात्वाप्रविन्यसे
त्॥इतिध्यात्वा॥तत्रविशुद्धेऊर्ध्वस्तुर्विषोडशदलप
द्मेध्यात्वा॥ॐऐंह्रींश्रींअंनमः॥ॐऐंह्रींश्रींआंनमः
ॐऐंह्रींश्रींइंनमः॥ॐऐंह्रींश्रींईंनमः॥ॐऐंह्रींश्रींउं
नमः॥ॐऐंह्रींश्रींऊंनमः॥ॐऐंह्रींश्रींऋंनमः॥ॐऐं

ह्रीं श्रीं ॠं नमः ॥ ॐ ऐं ह्रीं श्रीं लृं नमः ॥ ॐ ऐं ह्रीं श्रीं ॡं
नमः ॥ ॐ ऐं ह्रीं श्रीं एं नमः ॥ ॐ ऐं ह्रीं श्रीं ऐं नमः ॥ ॐ
ऐं ह्रीं श्रीं ओं नमः ॥ ॐ ऐं ह्रीं श्रीं औं नमः ॥ ॐ ऐं ह्रीं श्रीं
अं नमः ॥ ॐ ऐं ह्रीं श्रीं अः नमः ॥ ततोऽनाहते ॥ ॐ ऐं
ह्रीं श्रीं कं नमः ॥ ॐ ऐं ह्रीं श्रीं खं नमः ॥ ॐ ऐं ह्रीं श्रीं गं
नमः ॥ ॐ ऐं ह्रीं श्रीं घं नमः ॥ ॐ ऐं ह्रीं श्रीं ङं नमः ॥ ॐ ऐं
ह्रीं श्रीं चं नमः ॥ ॐ ऐं ह्रीं श्रीं छं नमः ॥ ॐ ऐं ह्रीं श्रीं जं न
मः ॥ ॐ ऐं ह्रीं श्रीं झं नमः ॥ ॐ ऐं ह्रीं श्रीं ञं नमः ॥ ॐ ऐं
ह्रीं श्रीं टं नमः ॥ ॐ ऐं ह्रीं श्रीं ठं नमः ॥ ततो मणिपूरके

ना॰
पु॰
२९

नाभौ ॥ ॐ ऐं ह्रीं श्रीं डं नमः ॥ ॐ ऐं ह्रीं श्रीं ढं नमः ॥ ॐ ऐं ह्रीं
श्रीं णं नमः ॥ ॐ ऐं ह्रीं श्रीं तं नमः ॥ ॐ ऐं ह्रीं श्रीं थं नमः ॥
ॐ ऐं ह्रीं श्रीं दं नमः ॥ ॐ ऐं ह्रीं श्रीं धं नमः ॥ ॐ ऐं ह्रीं श्रीं नं
नमः ॥ ॐ ऐं ह्रीं श्रीं पं नमः ॥ ॐ ऐं ह्रीं श्रीं फं नमः ॥ ततः
स्वाधिष्ठाने ॥ ॐ ऐं ह्रीं श्रीं बं नमः ॥ ॐ ऐं ह्रीं श्रीं भं नमः ॥
ॐ ऐं ह्रीं श्रीं मं नमः ॥ ॐ ऐं ह्रीं श्रीं यं नमः ॥ ॐ ऐं ह्रीं श्रीं
रं नमः ॥ ॐ ऐं ह्रीं श्रीं लं नमः ॥ ततो मूलाधारे ॥ ॐ ऐं
ह्रीं श्रीं वं नमः ॥ ॐ ऐं ह्रीं श्रीं शं नमः ॥ ॐ ऐं ह्रीं श्रीं षं न
मः ॥ ॐ ऐं ह्रीं श्रीं सं नमः ॥ ततो भ्रूमध्येऽज्ञाचक्रे ॥ ॐ

70

ऐं ह्रीं श्रीं ह्रें नमः ॥ ओं ऐं ह्रीं श्रीं ह्रं नमः ॥ अथ वह्निमीत्त
कान्यासः ॥ नवऋष्यादिकं पूर्ववत् ॥ अथ ध्यानम् ॥ ओं
पंचाशद्वर्णभेदैर्विहितवदनदोःपादयुक्कुक्षिव
क्षोदेशां भास्वत्कपर्दाकलितशशिकलामिंदुकुंदा
वदातां ॥ अक्षस्रक्कुंभचिंतालिखितवरकरां त्रीक्ष
णां पद्मसंस्थां अच्छाकल्पामतुच्छस्तनजघनभरां
भारतीं तां नमामि ॥ इति ध्यानं ॥ ओं ऐं ह्रीं श्रीं अंआंइत्या
दिक्षांतमुच्चार्य व्यापकं न्यसेत् ॥ १ ॥ ओं ऐं ह्रीं श्रीं अं न
मः शिरसि ॥ ओं ऐं ह्रीं श्रीं आं नमः मुखवृत्ते ॥ ओं ऐं ह्रीं

ना॰
पूं॰
२७

27

श्रीं ईं नमः ॥ दक्षनेत्रे ॥ ॐ ऐं ह्रीं श्रीं ईं नमः ॥ वामे ॥ ॐ ऐं ह्रीं श्रीं उं नमः ॥ दक्षकर्णे ॥ ॐ ऐं ह्रीं श्रीं ऊं नमः ॥ वामे ॥ ॐ ऐं ह्रीं श्रीं ऋं नमः ॥ दक्षनसि ॥ ॐ ऐं ह्रीं श्रीं ॠं नमः ॥ वामे ॥ ॐ ऐं ह्रीं श्रीं ऌं नमः ॥ दक्षगंडे ॥ ॐ ऐं ह्रीं श्रीं ॡं नमः ॥ वामे ॥ ॐ ऐं ह्रीं श्रीं एं नमः ॥ ऊर्ध्वोष्ठे ॥ ॐ ऐं ह्रीं श्रीं ऐं नमः ॥ अधरे ॥ ॐ ऐं ह्रीं श्रीं ओं नमः ॥ ऊर्ध्वदंतपंक्तौ ॥ ॐ ऐं ह्रीं श्रीं औं नमः ॥ अधोदंतपंक्तौ ॥ ॐ ऐं ह्रीं श्रीं अं नमः ॥ शिरसि ॥ ॐ ऐं ह्रीं श्रीं अः नमः ॥ जिह्वायां ॥ ॐ ऐं ह्रीं श्रीं कं खं गं घं ङं नमः ॥ दक्षबाहुमूलसंधिषु ॥ ॐ ऐं ह्रीं श्रीं चं छं जं झं ञं

नमः॥ वामवाहुसंधिषु॥ ॐ ऐं ह्रीं श्रीं टं ठं डं ढं णं नमः॥
दक्षपादसंधिषु॥ ॐ ऐं ह्रीं श्रीं तं थं दं धं नं नमः॥ वामपा
दसंधिषु॥ ॐ ऐं ह्रीं श्रीं पं नमः॥ दक्षपार्श्वे॥ ॐ ऐं ह्रीं श्रीं
फं नमः॥ पृष्ठे॥ ॐ ऐं ह्रीं श्रीं बं नमः॥ वामे॥ ॐ ऐं ह्रीं श्रीं भं
नमः॥ नाभौ॥ ॐ ऐं ह्रीं श्रीं मं नमः॥ जठरे॥ ॐ ऐं ह्रीं श्रीं यं
त्वगात्मने नमः॥ हृदि॥ ॐ ऐं ह्रीं श्रीं रं असृगात्मने नमः
दक्षांसे॥ ॐ ऐं ह्रीं श्रीं लं मांसात्मने नमः॥ ककुदि॥ ॐ ऐं
ह्रीं श्रीं वं मेदात्मने नमः॥ वामांसे॥ ॐ ऐं ह्रीं श्रीं शं अस्थ्या
त्मने नमः॥ हृदादिदक्षपादांते॥ ॐ ऐं ह्रीं श्रीं षं मज्जात्म

नेनमः॥हृदादिवामपादांते॥ॐऐंह्रींश्रींसंशुक्रात्म
नेनमः॥हृदादिदक्षपादांते॥हंप्राणात्मनेहृदादिवा
मपादांते॥ॐऐंह्रींश्रींलंजीवात्मनेनमः॥पादादिना
भ्यंते॥ॐऐंह्रींश्रींहंपरमात्मनेनमः॥नाभ्यादिमूर्धां
ते॥अथश्रीकंठन्यासः॥यथा॥ह्रींह्सींह्स्त्रींअंश्रीकंठेशा
यपूर्णोदर्यैनमः॥ह्रींह्सींह्स्त्रींआंअनंतेशायनमः॥ह्रीं
ह्सींह्स्त्रींइंसूक्ष्मेशायनमः॥ह्रींह्सींह्स्त्रींईंत्रिमूर्तेशायन
मः॥ह्रींह्सींह्स्त्रींउंअमरेशायनमः॥ह्रींह्सींह्स्त्रींऊंअर्घी
शायनमः॥ह्रींह्सींह्स्त्रींऋंभारभूतेशायनमः॥ह्रींह्सीं

ता॰ पू॰ २८

स्त्रीं कंस्तिथीशाय नमः॥ ह्रीं श्रीं स्त्रीं लंस्थानकेशा
य नमः॥ ह्रीं श्रीं स्त्रीं ल्हंहरकेशाय नमः॥ ह्रीं श्रीं स्त्रीं
पंजिंटीशाय नमः॥ ह्रीं श्रीं स्त्रीं पंभौतिकेशाय नमः॥
ह्रीं श्रीं स्त्रीं ॐ सद्योजातेशाय नमः॥ ह्रीं श्रीं स्त्रीं ॐ अ
नुग्रहेशाय नमः॥ ह्रीं श्रीं स्त्रीं अं अक्रूरेशाय नमः॥ ह्रीं
श्रीं स्त्रीं अंः महासेनेशाय नमः॥ ह्रीं श्रीं स्त्रीं कंक्रोधी
शाय नमः॥ ह्रीं श्रीं स्त्रीं चंचंडेशाय नमः॥ ह्रीं श्रीं स्त्रीं
गंपंचांतकेशाय नमः॥ ह्रीं श्रीं स्त्रीं घंशिवोत्तमेशा
य नमः॥ ह्रीं श्रीं स्त्रीं ङं एकरुद्रेशाय नमः॥ ह्रीं श्रीं स्त्रीं

ता॰
सू॰
२५
79

चं कूर्मेशाय नमः॥ ह्रीं श्रीं स्त्रीं छं एकनेत्रेशाय नमः
ह्रीं श्रीं स्त्रीं जं चतुराननेशाय नमः॥ ह्रीं श्रीं स्त्रीं झं अ
जेशाय नमः॥ ह्रीं श्रीं स्त्रीं ञं शर्वरेशाय नमः॥ ह्रीं श्रीं
स्त्रीं टं सोमेशाय नमः॥ ह्रीं श्रीं स्त्रीं ठं लाङ्गलीशाय न
मः॥ ह्रीं श्रीं स्त्रीं डं दारुकेशाय नमः॥ ह्रीं श्रीं स्त्रीं ढं अ
र्धनारीश्वराय नमः॥ ह्रीं श्रीं स्त्रीं णं उमान्तिकेशाय न
मः॥ ह्रीं श्रीं स्त्रीं तं आषाढीशाय नमः॥ ह्रीं श्रीं स्त्रीं थं द
ण्डीशाय नमः॥ ह्रीं श्रीं स्त्रीं दं अत्रीशाय नमः॥ ह्रीं श्रीं स्त्रीं
धं मीनेशाय नमः॥ ह्रीं श्रीं स्त्रीं नं मेषेशाय नमः॥ ह्रीं

ह्सीं ह्स्त्रीं पं लोहितेशाय नमः॥ ह्रीं ह्सीं ह्स्त्रीं फं शिखीशाय नमः॥ ह्रीं ह्सीं ह्स्त्रीं बं छागण्डेशाय नमः॥ ह्रीं ह्सीं ह्स्त्रीं भं द्विरण्डेशाय नमः॥ ह्रीं ह्सीं ह्स्त्रीं मं महाकालेशाय नमः॥ ह्रीं ह्सीं ह्स्त्रीं यं त्वगात्मने नमः॥ ह्रीं ह्सीं ह्स्त्रीं रं असृगात्मने नमः॥ ह्रीं ह्सीं ह्स्त्रीं लं मांसात्मने नमः॥ ह्रीं ह्सीं ह्स्त्रीं वं मेदसात्मने त्वक्लीशाय नमः॥ ह्रीं ह्सीं ह्स्त्रीं शं अस्थ्यात्मने वर्यकेशाय नमः॥ ह्रीं ह्सीं ह्स्त्रीं षं मज्जात्मने श्वेनेशाय नमः॥ ह्रीं ह्सीं ह्स्त्रीं सं शुक्रात्मने भृगवीशाय नमः॥ ह्रीं ह्सीं ह्स्त्रीं हं प्राणात्मने ऊलेशाय नमः॥

ता॰ ह्रीं श्रीं स्त्रीं लें जीवात्मने शिवेशाय नमः॥ ह्रीं श्रीं स्त्रीं हंः
मु॰ परमात्मने संवर्तकेशाय नमः॥ इति श्रीकंठन्यासः॥ अथ
कुं॰ ग्रहन्यासः॥ ॐ ह्रीं श्रीं अं अं आं इत्यादि॥ रवे॥ रक्तवर्णाय
४० सूर्याय नमः॥ भ्रूमध्ये॥ ॐ ह्रीं श्रीं यं रं लं वं शुक्लवर्णाय
सोमाय नमः॥ नेत्रयोः॥ ॐ ह्रीं श्रीं कं खं गं घं ङं रक्तवर्णा
य भौमाय नमः॥ हृदये॥ ॐ ह्रीं श्रीं चं छं जं झं ञं मेचवर्णा
य य बुधाय नमः॥ कंठे॥ ॐ ह्रीं श्रीं टं ठं डं ढं णं पीतवर्णाय
बृहस्पतये नमः॥ हृन्मध्ये॥ ॐ ह्रीं श्रीं तं थं दं धं नं श्वेतव
र्णाय शुक्राय नमः॥ नाभौ॥ ॐ ह्रीं श्रीं पं फं बं भं मं कृष्णव

र्णाय शनैश्चराय नमः ॥ मुखे ॥ ॐ ह्रीं श्रीं यं रं लं वं नील
वर्णाय राहवे नमः ॥ पादयोः ॥ ॐ ह्रीं श्रीं शं षं सं हं लं क्षः
धूम्रवर्णाय केतवे नमः ॥ सर्वांगेषु ॥ अथ लोकपालन्यासः
ह्रीं श्रीं ङ अं इं उं ऋं लृं एं ओं अं इन्द्राय नमः ॥ मस्तके ॥ ह्रीं श्रीं
ङ आं ईं ऊं ॠं ॡं ऐं औं अः अग्नये नमः ॥ दक्षललाटे ॥ ह्रीं श्रीं
ङ कं खं गं घं ङं यमाय नमः ॥ दक्षकर्णे ॥ ह्रीं श्रीं ङ चं छं
जं झं ञं निर्ऋतये नमः ॥ दक्षकर्णपृष्ठे ॥ ह्रीं श्रीं ङ टं ठं डं
ढं णं वरुणाय नमः ॥ वोरहृपे ॥ ह्रीं श्रीं ङ तं थं दं धं नं वा
यवे नमः ॥ वामकर्णपृष्ठे ॥ ह्रीं श्रीं ङ पं फं बं भं मं सोमा

ता॰
पू॰
३१
31

यनमः॥वामकर्णे॥ह्रीं श्रीं ऊं यं रं लं वं ईशानायनमः॥वा
मललाटे॥ह्रीं श्रीं ऊं शं षं सं हं ब्रह्मणेनमः॥मूर्ध्नि॥ह्रीं श्रीं
ऊं लं क्षं अनंतायनमः॥पादाग्रे॥इतिलोकपालन्यासः॥अथ
शिवशक्तिन्यासः॥ह्रीं श्रीं ऊं अं आः कं खं गं घं ङं भीमायैनमः॥
ब्रह्मरंध्रे॥ह्रीं श्रीं ऊं इं ईं चं छं जं झं ञं उग्रायैनमः॥ललाटे॥
ह्रीं श्रीं ऊं उं ऊं टं ठं डं ढं णं महोग्रायैनमः॥भ्रूमध्ये॥ह्रीं श्रीं ऊं
ऋं ॠं तं थं दं धं नं वज्रायैनमः॥कंठे॥ह्रीं श्रीं ऊं लृं ॡं पं फं
बं भं मं कालायैनमः॥हृदि॥ह्रीं श्रीं ऊं एं ऐं यं रं लं वं मर
स्वस्यैनमः॥नाभौ॥ह्रीं श्रीं ऊं ओं औं शं षं सं हं कामेश्वर्यैन

मः॥मूलाधारे॥ह्रीं स्त्रीं ह्रूं लं ह्लः रुद्राण्यै नमः॥पादयोः॥
इति ताराण्यासः॥अथ पीठन्यासः॥ह्रीं स्त्रीं ह्रूं अं इं उं ऋं लृं
एं ओं अं कामरूपपीठाय नमः॥मूलाधारे॥ह्रीं स्त्रीं ह्रूं आं
ईं ऊं ॠं ॡं ऐं औं अः जालंधरपीठाय नमः॥हृदि॥ह्रीं स्त्रीं
ह्रूं पूर्णगिरिपीठाय नमः॥ललाटे॥ह्रीं स्त्रीं ह्रूं चं छं जं झं
ञं टं ठं डं ढं णं वाराणसीपीठाय नमः॥भ्रुवोः॥ह्रीं स्त्रीं ह्रूं
तं थं दं धं नं अवन्तीपीठाय नमः॥नयनद्वये॥ह्रीं स्त्रीं ह्रूं
पं फं बं भं मं मायापुरीपीठाय नमः॥मुखे॥ह्रीं स्त्रीं ह्रूं यं
रं लं वं मधुरापुरीपीठाय नमः॥कंठे॥ह्रीं स्त्रीं ह्रूं शं षं सं

ता॰
पू॰
३२

ह्रं स्वयोध्यापुरीपीठायनमः॥ नाभौ॥ ह्रीं स्त्रीं ऊं लं ह्रंः कांची
पुरीपीठायनमः॥ कट्यां॥ इतिपीठन्यासः॥ अथान्यप्रकारेण
षोढान्यासः॥ मूलेनमूलेनमः॥ शिरसि॥ आं क्लीं आं क्लीं
आं क्लीं नमो॥ मुखवृत्ते॥ इं क्लीं इं क्लीं इं क्लीं नमो॥ दक्षनेत्रे॥
ईं क्लीं ईं क्लीं ईं क्लीं नमो॥ वामनेत्रे॥ उं क्लीं उं क्लीं उं क्लीं नमो॥
दक्षकर्णे॥ ऊं क्लीं ऊं क्लीं ऊं क्लीं नमो॥ वामकर्णे॥ ऋं क्लीं ऋं
क्लीं ऋं क्लीं नमो॥ दक्षनासि॥ ॠं क्लीं ॠं क्लीं ॠं क्लीं नमो॥
वामनासि॥ ऌं क्लीं ऌं क्लीं ऌं क्लीं नमो॥ दक्षगंडे॥ ॡं क्लीं ॡं
क्लीं ॡं क्लीं नमो॥ वामगंडे॥ एं क्लीं एं क्लीं एं क्लीं नमो॥ ऊर्ध्वोष्ठे

ऐंह्लींऐंह्लींऐंह्लींनमो॥अधरोष्ठे॥ओंह्लींओंह्लींओंह्लींन
मः॥ऊर्ध्वदन्तपंक्तौ॥औंह्लींऔंह्लींऔंह्लींनमः॥अधोदन्त
पंक्तौ॥अंह्लींअंह्लींअंह्लींनमो॥ललाटे॥अःह्लींअःह्लीं
अःह्लींनमः॥नमोमुखे॥कंह्लींकंह्लींकंह्लींनमो॥दक्ष
बाहुमूले॥खंह्लींखंह्लींखंह्लींनमो॥दक्षकूर्परे॥गंह्लीं
गंह्लींगंह्लींनमो॥दक्षमणिबन्धे॥घंह्लींघंह्लींघंह्लींन
मो॥दक्षाङ्गुलिमूले॥ङंह्लींङंह्लींङंह्लींनमो॥दक्षाङ्गुल्य
ग्रे॥चंह्लींचंह्लींचंह्लींनमो॥वामबाहुमूले॥छंह्लींछंह्लीं
छंह्लींनमो॥वामकूर्परे॥जंह्लींजंह्लींजंह्लींनमो॥मणि

ना॰
पू॰
३३

33

वं पं ॥ झं क्लीं झं क्लीं झं क्लीं नमो ॥ वामांगुल्यग्रे ॥ ञं क्लीं ञं क्लीं
वज्र॰ पूजयामिनमः॥ तर्पयामिनमः॥ ॐकुलेश्वरा
नंदनाथव॰ पूजयामिनमः॥ तर्पयामिनमः॥ विद्र

ता॰
सू॰
७॰

70

पाह्लानंदनाथवज्र॰ पूजयामि नमः॥ तर्पयामि नमः॥
ॐ फेरवेंबव॰ पूजयामि नमः॥ तर्पयामि नमः॥ तद्वै
वस्वगुरुपरंपरां पूजये तर्पयेश्च॥ ॐ दायाद्देवव॰
पूजयामि नमः॥ तर्पयामि नमः॥ ॐ श्राह्लादिदेवव॰
पूजयामि नमः॥ तर्पयामि नमः॥ ॐ मणिरामवाज
पेयानंदनाथव॰॥ पूजयामि नमः॥ तर्पयामि नमः॥
ॐ श्रीशिवानंदनाथव॰॥ पूजयामि नमः॥ तर्पयामि
नमः॥ श्रीस्तानानंदनाथश्रीव॰ पूजयामि नमः॥ त
र्पयामि नमः॥ हुंफट्स्वाहा॰ पूजयामि नमः॥ तर्प

ॐ गं गंगेव. पूजयामि नमः॥ तर्पयामि नमः॥ अ
ग्रे॥ ॐ यं यमुनेव. पूजयामि नमः॥ तर्पयामि न
मः॥ दक्षे॥ ॐ सं सरस्वतिव. पूजयामि नमः॥ तर्प
यामि नमः॥ वामे॥ इति त्रिकोणे संपूज्य॥ श्रीपात्रा
स्तेनेन संतर्प्य॥ ऊरदहस्यचन्त्र रंध्रतः संपूजये
यथा॥ ॐ पं पद्मांतकव. पूजयामि नमः॥ तर्पया
मि नमः॥ इति स्वाग्रे॥ पूर्वे॥ ॐ यं यमांतव. पूजया॥
मि नमः॥ तर्पयामि नमः॥ दक्षिणे स्ववामे॥ ॐ विं वि
घ्नांतकव. पूजयामि नमः॥ तर्पयामि नमः॥ इति

त्रा॰ पूं॰ ७३

देवताएछेस्वपूर्वे॥ ॐ नं नरकांनकव॰ पूजयामिन
मः॥ तर्पयामिनमः॥ उत्तरेस्वदहे॥ इतिसंपूज्य॥ वीर
पाज्ञास्तेननसंतर्प्य॥ ग्रहेवथरामरहेस्वदिशिव
क्रादीन्वज्रादीन्पूजयेयथा॥ ॐ लं इंद्रवज्र॰ पूजया
मिनमः॥ तर्पयामिनमः॥ ॐ रं अग्नेव॰ पूजयामिन
मः॥ तर्पयामिनमः॥ ॐ टं यमव॰ पूजयामिनमः॥ त
र्पयामिनमः॥ ॐ ह्रं नैरृत्येव॰ पूजयामिनमः॥ तर्प
यामिनमः॥ ॐ वं वरुणव॰ पूजयामिनमः॥ तर्पया
मिनमः॥ ॐ यं वायोव॰ पूजयामिनमः॥ तर्पयामिन

मः ॥ ॐ ऊं ऊ वैरव पूजयामि नमः ॥ तर्पयामि नमः ॥
ॐ ह्रं ईशानवज्र पूजयामि नमः ॥ तर्पयामि नमः ॥
ॐ ग्रां ब्रह्मव पूजयामि नमः ॥ तर्पयामि नमः ॥ ॐ
ह्रीं श्रनेतव पूजयामि नमः ॥ तर्पयामि नमः ॥ इ
ति संपूज्य ॥ चतुरस्रे ॥ श्रीपाशाम्भनेन मंतर्प्य ॥ श्रैत्रेव
वज्रादीन्पूजयेत् ॥ ॐ वज्रव पूजयामि नमः ॥ तर्प
यामि नमः ॥ ॐ शं शक्त्व पूजयामि नमः ॥ तर्पया
मि नमः ॥ ॐ दं दंडव पूजयामि नमः ॥ तर्पयामि न
मः ॥ ॐ खं खड्गव पूजयामि नमः ॥ तर्पयामि नमः ॥

ना·
पू·
७४

75

ॐ पं पाशाव· स्नपयामि नमः॥ तर्पयामि नमः॥ ॐ धं
धजव· स्नपयामि नमः॥ तर्पयामि नमः॥ ॐ गं गदे
व· स्नपयामि नमः॥ तर्पयामि नमः॥ ॐ त्रिं त्रिशू
लव· स्नपयामि नमः॥ तर्पयामि नमः॥ ॐ पं पद्म
व· स्नपयामि नमः॥ तर्पयामि नमः॥ ॐ चं चक्रव·॥
स्नपयामि नमः॥ तर्पयामि नमः॥ इति संस्नप्य॥ श्री
पात्रास्नेन संतर्प्य॥ इत्यावरणपूजा॥ ततः पुनर्वि
दौघपुष्पांजलिना त्रिवारं देवीं संस्नप्य॥ स्वर्णवस्त्रा
द्यादिभिः संस्नप्य॥ नैवेद्यं निवेद्य॥ श्रीदेवीं भोजना

भिरंगं विभाव्य॥ उत्तरापोशनादिकं कृत्वा॥ तांबू
लं निवेद्य॥ श्रीदेवीस्वप्रसन्नां विभाव्य॥ स्वात्मानं
कामकलारूपं ध्यात्वा॥ नित्यहोमं कुर्यात्॥ स्वाग्निमा
नीय स्थंडिले निक्षिप्य॥ मूलेनाभ्युक्ष्य॥ अग्निमेव
देवीरूपं ध्यात्वा॥ अभिषिच्य॥ मूलं श्रीनारायण्ये नमः
इति गंधपुष्पधूपदीपादिभिः संपूज्य॥ आज्यमानीयास्त
तो हुत्वा॥ मूलेन त्रिरभिमंत्र्य॥ नेन हविषा मूलवि
धेय यथाशक्तिंऽहुत्वा॥ आवरणानामेकैकाऽहुतिं
दत्वा॥ पुनर्मूलदेव्यैऽहुत्वा॥ प्राणायामादिपूर्वकं

ता॰
पू॰
७५

वह्निदेवतां विसृज्य भस्मना तिलकं कुर्यात् ॥ इति सूक्ष्मप्रकारेण नित्यहोमविधिः ॥ अस्मिन्नेवावसरे छागादि बलिं दद्यात् ॥ तत्र मूलेन पशुं संस्नाप्य ॥ मूलेन गंधपुष्पादिभिरलंकृत्य ॥ देव्यग्रे संस्थाप्य ॥ मूलेन प्रोक्ष्य अस्त्रेण संरक्ष्य ॥ कवचेनावगुंठ्य ॥ मूलीनामंत्रीकृत्य सर्वदेवतारूपिणी बलिरूपायाऽमुकपशवे नमः ॥ इति गंधादिना त्रिः संपूज्य ॥ तस्य कर्णे । पशुपाशाय विद्महे ॥ विश्वकर्णाय धीमहि ॥ तन्नो जीवः प्रचोदयात् ॥ इति पशुगायत्रीं कर्णे त्रिः पठित्वा ॥ प्रत्नः स्वांगं निया

य॥ ॐ ह्रीं कालिकालिवज्रेश्वरि लोहदंडायै नमः॥ इ
तिगंधादिनाभ्यर्च्य॥ नमस्तुभ्यं वागीश्वरिब्रह्माभ्यां न
मः॥ मध्ये॥ लक्ष्मीनारायणाभ्यां नमः॥ प्राग्रे॥ उमाम
हेश्वराभ्यां नमः॥ इति संपूज्य॥ नेष्टन्वा मंत्रयेत्॥ ॐ
खड्गाय खरनाशाय देवकार्यार्थिनम्परः॥ पशुश्छेय
स्त्वया शीघ्रं खड्गनाथ नमोस्तु ते॥ इत्यभिमंत्र्य॥ गंधा
दिकमानीय॥ मूलमयाऽमुकमासस्याऽमुकपक्षस्य
तिथावमुककार्यार्थममुकगोत्रामुकशर्मा श्रीमहाता
राभगवत्यै इमं पशुं तुभ्यमहमर्पयामि सुप्रसीद

ना॰ इति पठित्वा॥ तज्जलादिकं पशोः शिरसि निक्षिप्य॥ तच्छि
मू॰ रो धृत्वा॥ ओं यज्ञार्थं पशवः सृष्टाः यज्ञार्थं पशुघातनं
७८ अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधो ऽवधः॥ शिवा
76 यत्नामिदं पिंडमतस्त्वं शिवतां गतः॥ तदुद्भवस्य पशो
र्वह्निना शिवस्त्वं शिवो ऽसि हि॥ इति मंत्रं पठित्वा॥ ख
ड्गमादाय॥ ओं ह्रः अस्त्राय फट्॥ छिंधि छिंधि स्वाहा॥ इ
ति खड्गं तस्य स्कंधे नियोजयेत्॥ ततः स्वयं देवीरूपो भूत्वा
निर्विकल्पः॥ एकप्रहारेण छिंद्यात्॥ सविकल्पः पर
हस्तेन छेदयेत्॥ एवैव ब्राह्मणानि द्विजः स्वास्वादि

बलिंदत्वा ॥ इति बलिदानविधिः ॥ ततो मूलेन देवीं सं
पूज्य ॥ रक्तमस्तीकल्पनेन रक्तेन ॥ मूलं स्मरन् दे
वीं संतर्प्य ॥ बटुकादिभूपाद्येभ्यो रक्तेन निक्षिप्य ॥ देवीं
नमस्येत् ॥ अथ कुमारीपूजा ॥ तत्र ॥ सर्वलक्षणसं
पन्नां परिष्कृतां सुवासिनीं वा कन्यामानीय ॥ तस्याः
पादौ प्रक्षाल्य ॥ शुद्धवस्त्रेण मार्जयित्वा ॥ पूजापी
ठे समुपवेश्य ॥ सन्नेपनं पीठपूजां विधाय ॥ तत्रोप
विष्टायां तस्यां मूलेन देवीमावाह्य ॥ मूलं श्रीकुल
कुमारिके वज्रहस्ते प्रतीच्छ हुं फट् स्वाहा ॥ इति पु

ता॰
पू॰
११

ष्ठांजलिनाद्भिः संपूज्य॥ पुनस्तथैव मूलेन गंधपुष्पा
दिकैस्तस्याः पादौ संपूज्य॥ दीपानेहृपचारैः सम
भ्यर्च्य॥ जातदेवीरूपां ध्यायन्यथोचितेनाभोजयित्वा॥
तांबूलं समर्पयेत्॥ वस्त्रालंकारदक्षिणादिकं यथा॥ श
क्ति दत्वा विसर्जयेत्॥ इति कुमारीपूजाविधिः॥ ततो गु
रुदेवो ध्यायन्प्राणायामऋष्यादिकरषडंगध्याना
नि कृत्वा॥ मंत्रसंस्कारं कुर्यात्॥ ह्रीं ह्रौं ॐ फट् क्लीं इत्य
कीलनं विजपेत्॥ ह्रौं ह्रौं ॐ फट् क्लीं क्लीं इति संजीव
नविधिः॥ नैवेद्यं मूलेयंन॥ इति नोटल्पविधिः॥ ॐ ह्रीं ह्रौं

ब्रह्मशापं मोचय मोचय स्वाहा ॥ इति शापहारी दशाया
ॐ मूलं ॐ इत्यस्य शापोच्छ्रय निवारणार्थे समर्था ॥ इत्ये
नान्तसंस्कारान्कृत्वा ॥ ध्यानपरिहस्य संस्कारान्कृत्वा
सद्योजातमंत्रेद शधा जप्त्वा वामहस्ते पात्रे वा मालां
संस्थाप्य ॥ सामान्यार्घजलेनाभ्युक्ष्य ॥ ॐ माले माले
महामाले सर्वशक्तिस्वरूपिणि ॥ चतुर्वर्गस्त्वयि न्य
स्तस्तस्मान्मे सिद्धिदा भव ॥ इति मालां मूलेन गंधादिना
संपूज्य ॥ गमविघ्नं कुरु माले त्वं ॥ इति दक्षकरेणग्र
हीत्वा ॥ मूलं यथाशक्ति जप्त्वा जपान्ते ॥ त्वं माले सर्व

ता॰
सू॰
७८
78

देवानांऽपीति दाशुभदा भव ॥ शुभं कुरु ममेदेवि यशो
वीर्यं च सर्वदा ॥ इति पठन्स्वशिरसि ॥ मालां समस्थाप्य
पुनरपि प्राणायामादिना जपं समर्प्य ॥ दशावारं स
योजानमंत्रं जप्त्वा ॥ फट् क्लीं ह्रीं ह्लीं ऽ इति संपुटं विजे
प्त्वा ॥ गुह्योत्पन्नेन समामान्याघौंदकेन तेजो हृपं जपफ
लं श्रीदेवीवामहस्ते समर्प्य ॥ कवचसहस्रनामस्तो
त्रपाठादिकं नित्यं विधिगुरुक्रमोत्तमपि पठित्वा ॥ ओं सर्व
मंगलमं॰ ॥ इति वज्रवीरप्रदक्षिणीक्रमः ॥ अपराधो
भवत्येवमेव कस्य पदे पदे ॥ कोऽपरः सहते लोके के

यामिनमः॥ ॐ श्रीमच्छ्रीगुरुकानंदनाथपा० पूजया

मिनमः॥ तर्पयामिनमः॥ इतिगुरुपंक्तिं पूजयेत्॥ इति

संपूज्यगुरुपात्रामृतेन संतर्प्य॥ इतिमानवौघः॥ ततोदे

वीमौलौगुरुत्रोभ्यर्च्य पूजयामिनमः॥ तर्पयामिनमः॥

इतिगुरुपंक्तित्रयं संपूज्य संतर्प्य॥ पश्चाद्गेहचक्रदिक्षु

गणेशादीन्पूजयेद्यथा॥ ॐ गंगणेशपा० पूजयामिन

मः॥ तर्पयामिनमः॥ इतिपूर्वे॥ ॐ वंवटुकवज्रपुष्पं

पूजयामिनमः॥ तर्पयामिनमः॥ इतिदक्षिणे॥ ॐ क्षं

क्षेत्रपालपा० पूजयामिनमः॥ तर्पयामिनमः॥ इतिप

ता· पू· ७१
७५

श्चिमे॥ॐयांयोगिन्योव·पूजयामिनमः॥तर्पयामिन
मः॥इतिउत्तरे॥इतिसंपूज्य॥वीरपात्राम्रतेनसंतर्प्य॥दे
व्यग्रदलमारभ्यसावर्तेनाष्टदलंपूरयेत्॥ॐवैंवैरो
चनवज्र·पूजयामिनमः॥तर्पयामिनमः॥इतिपूर्वे॥
ॐश्रंसितनाभव·पूजयामिनमः॥तर्पयामिनमः॥इति
दक्षिणे॥ॐपंपद्मनाभव·पूजयामिनमः॥तर्पयामि
नमः॥इतिपश्चिमे॥ॐशंशंखपाण्डुरव·पूजयामिन
मः॥तर्पयामिनमः॥इत्युत्तरे॥ॐलंलामकव·पूजया
मिनमः॥तर्पयामिनमः॥इत्याग्नेये॥ॐमंमामकव·॥पू

मा

जयामिनमः॥तर्पयामिनमः॥इतिनैर्ऋते॥ॐनंतमा
रकवच्चस्त्रजयामिनमः॥तर्पयामिनमः॥इतिवायव्ये
ॐपांडुरवज्र·स्त्रजयामिनमः॥तर्पयामिनमः॥इत्यी
शाने॥इत्यष्टदलेसंपूज्य॥वीरपात्रामृतेनसंतर्प्य॥
षट्कोणषडंगशक्तीःपूजयेद्यथा॥देव्यग्रकोणमा
रभ्यवामावर्तेन॥ॐएकजटेहृदयशक्तेव·स्त्रजया
मिनमः॥तर्पयामिनमः॥ह्रींतारिणीशिरःव·स्त्रज
यामिनमः॥तर्पयामिनमः॥स्त्रींवज्रोदकेशिखाश
क्तेव·स्त्रजयामिनमः॥तर्पयामिनमः॥फ्रेंउग्रतारेक

ता॰
पू॰
७२
४०

वचशाक्रेव॰॥पूजयामिनमः॥तर्पयामिनमः॥मह्रा
प्रतिमरेनेत्रशाक्रेव॰॥पूजयामिनमः॥तर्पयामिन
मः॥सर्वेमलेपिंगोग्रेकजटेश्वरव॰पूजयामिनमः
तर्पयामिनमः॥इतिषट्कोणषडंगंसंपूज्य॥वीर
पात्रामृतेनेनसंतर्प्य॥देव्याग्रकोणमारभ्यत्रिकोणेषु
जयेचयथा॥ॐउग्रतारेव॰पूजयामिनमः॥तर्पयामि
नमः॥दक्षे॥ॐनीलसरस्वतिव॰पूजयामिनमः॥
तर्पयामिनमः॥इतिदक्षिणे॥ॐपिंगोग्रेकजटेव॰॥
पूजयामिनमः॥तर्पयामिनमः॥इतिवामे॥प्रथवा

वलं स्वामिनं विना ॥ अपराधसहस्राणि क्रियन्तेऽहर्नि
शं मया ॥ मम कृत्यमिदं ज्ञात्वा क्षमस्व परमेश्वरि ॥ इ
त्यर्घ्यं ग्रहणि पत्र ॥ ततः सामान्यार्घोदकं चुलकेन गृ
हीत्वा ॥ ततः सर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्व
प्नसुषुप्त्यवस्थासु कर्मणा मनसा वाचा पद्भ्यामुदरे
ण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं मां मदीयं स
कलं तारा भगवती चरणकमलसमर्पणमस्तु ॥ ॐ
तत्सत् ॥ इति सामान्यार्घोदकसमर्पणं ॥ अंजलिं ब
द्धा पटेन ॥ ॐ यद्दत्तं भक्तिमात्रेण पत्रं पुष्पं फलं जपं

त्रा॰ पु॰ ७५

91

निवेदितं च नैवेद्यं तद्गृहाणानुकंपया ॥ आज्ञातं नैव जा॰
देवी दासीव भोक्त्री च देवी सर्वमिदं जगत् ॥ देवी जयति
सर्वत्र या देवी सोहमेव हि ॥ यदक्षरं ॥ मंत्रहीनं ॥ प्रातः
प्रभृ॰ ॥ नमस्ते देवदेवेशि श्रीनारे परमेश्वरि ॥ तव पादां-
बुजे नित्यं निश्चला भक्तिरस्तु मे ॥ इति देवीं प्रार्थ्य जलि-
नात्तमाप्य ॥ ततः शंखं समुत्थाय ॥ साधु वासाधु वा कर्म
यद्यदाचरितं मया ॥ तत्सर्वं कृपया देवि गृहाणाराध-
नं मम ॥ इति शंखं त्रिः परिभ्राम्य ॥ तज्जलं देवीदक्षह-
स्ते समर्प्य ॥ पुनस्तज्जलं वामहस्तेन गृहीत्वा ॥ शंखं

स्वस्थाने संस्थाप्य ॥ तज्जलेन स्वमंत्रेण संमंत्र्य ॥ तेन ज
लेन सम्यथामूलं पठन् स्वशरीरं संप्रोक्षयेत् ॥ ततः पु
ष्पांजलिं गृहीत्वा ॥ ॐ गच्छ गच्छ परे स्थाने स्वस्थाने प
रमेश्वरि ॥ यत्र ब्रह्मादयो देवा न विदुः परमं पदं ॥ इति
देवीं विसृज्य ॥ संहारमुद्रया निर्माल्यपुष्पमाघ्राय इंद्रि
क्षिप क्षिप परे स्थाने स्वस्थाने परमेश्वरि ॥ यत्र ब्रह्मादयः
सर्वे सुरास्तिष्ठंति मे हृदि ॥ इति श्रीचक्रे तेजोरूपा देवी
मानसार्घ्या ॥ संहारमुद्रया निर्माल्यपुष्पं गृहीत्वा ॥
वामनासयाघ्राय तां तेजोरूपां शिवसमीपं नीत्वा ॥

ता॰ पू॰ ८॰ 82 80

तयोरैक्यं विभाव्य नत्वा तेजोमयीं देवीं सुषुम्नामार्गेण स्वहृदि समानीय ॥ तत्त्रयण्याक्त रूपां सेव्यापयेत् ॥ ततः चंडेश्वराय नमः ॥ इति निर्माल्यं संत्यज्य ॥ ईशानकोणे त्रिकोणं संलिख्य ॥ तत्र ॥ ॐ ह्रीं उच्छिष्टचंडालिनि सर्वसत्ववशंकरि स्वाहा ॥ इति उच्छिष्टचंडालिनी निर्माल्यं संत्यज्य ॥ ॐ ॐ ॐ योगिनीभ्यो नमः ॥ इति योगिनीबलिः ॥ ॐ ॐ ॐ ह्रां ह्रैं ह्रः क्षेत्रपालेभ्यो नमः ॥ इति क्षेत्रपालबलिः ॥ शिरसि निर्माल्यं धृत्वा ॥ इति विसृज्य ॥ नमो विवस्वते ब्रह्मन् ॥ इति सूर्यस्यांजलिः ॥ ततः ॥

न्नमापनम्॥ इदन्नरपदमखंमानाहिमेवयज्ञ
ते॥ मयादासेनविज्ञनमतिस्मतांपरमेश्वरि ॥ १
यन्नच्छिद्रंनपच्छिद्रंयच्छिद्रंयजनेमम॥ सच्छिद्र
मस्तुनेसर्वंभास्करस्यप्रसादतः॥ इतोच्छिद्रंसव
धारयेत्॥ इतिश्रीरुद्रयामलेतंत्रेउग्रतारापद्धतिःसमा
प्तम्॥ संवत्॥ ९९ ष्ठ ग॥ चैत्र॥ प्र॥ ६॥ लिखितं॥
तोतनकौल ॥ शुभम्॥

83

नाः
कः
१

ॐश्रीनीलसरस्वत्यैनमः॥ श्रीईश्वरउवाच॥ कोटितंत्रेषु गोप्याहिविद्याभ्रान्तिभयमोचिनी॥ दिव्यंतुकवचंतस्याः शृणुष्वसर्वकामदं॥१॥ ॐअस्यश्रीताराकवचस्य॥ अक्षोभ्यऋषिः॥ त्रिष्टुछंदः॥ श्रीताराभगवती देवता॥ ह्रींवीजं॥ स्त्रींशक्तिः॥ ऊंकीलकं॥ श्रीतारानीलसरस्वतीप्रसादसिद्ध्यर्थेपाठेविनियोगः॥ अथऋष्यादिन्यासः॥ अक्षोभ्यऋषयेनमः॥ शिरसे॥ त्रिष्टुछंदसेनमो॥ मुखे॥ श्रीताराभगवतीदेवतायैनमः॥ हृदि॥ ह्रींवीजायैनमो गुह्ये॥ स्त्रींशक्तयेनमः॥ पादयो॥ ऊंकीलकायनमः॥ ना

मै॥ श्रीनारायनीलसरस्वतीप्रसादसिद्ध्यर्थेपाठेविनियो
गः॥ सर्वांगेषु॥ इतिऋष्यादिन्यासः॥ अथकरन्यासः॥ ह्रींअं
गुष्ठाभ्यांनमः॥ ह्रैंतर्जनीभ्यांस्वाहा॥ ह्रूंमध्यमाभ्यांवष
ट्॥ ह्रींअनामिकाभ्यांहुम्॥ ह्रैंकनिष्ठकाभ्यांवौषट्॥ ह्रूं
करतलकरपृष्ठाभ्यांफट्॥ इतिकरन्यासः॥ अथहृदयादि
न्यासः॥ ह्रींहृदयायनमः॥ ह्रैंशिरसेस्वाहा॥ ह्रूंशिखा
यैवषट्॥ ह्रींकवचायहुम्॥ ह्रैंनेत्रत्रयायवौषट्॥
ह्रूंअस्त्रायफट्॥ इतिहृदयादिन्यासः॥ प्रणवोमेशिरः
पातुब्रह्मरूपामहेश्वरी॥ ह्रींकारःपातुललाटे बीज

ता॰ क॰ २

रूपा महेश्वरी ॥ ह्रींकारः पातु वदने लज्जारूपा महेश्वरी
हूंकारः पातु हृदये भवानी शक्तिरूपधृक् ॥ फट्कारः पा
तु सर्वांगे सर्वसिद्धिफलप्रदा ॥ खर्वा मां पातु देवेशी गं
डयुग्मे भयापहा ॥ लंबोदरी सदा स्कंदयुग्मे पातु महेश्व
री ॥ व्याघ्रचर्मावृतकटी पातु देवी शिवप्रिया ॥ पीनोन्न
तस्तनी पातु पार्श्वयुग्मे महेश्वरी ॥ रक्तवर्तुलनेत्रा च
कटिदेशे सदावतु ॥ ललज्जिह्वा सदा पातु नाभौ मां भु
वनेश्वरी ॥ करालास्या सदा पातु लिंगे देवी हरप्रिया ॥ पिं
गोग्रैकजटा पातु जंघायां विघ्ननाशिनी ॥ प्रेतखर्परधरा

देवीजानुचक्रेमहेश्वरी॥नीलवर्णासदापातुजानुनी
सर्वदामम॥नागकुंडधरादेवीपातुपादयुगेततः॥
नागहारधरादेवीसर्वांगंपातुसर्वदा॥नागांगदधरा
देवीपातुमांप्रांतदेशतः॥चतुर्भुजासदापातुगमने
शत्रुनाशिनी॥खड्गहस्तामहादेवीपातुमांविजयप्र
दा॥नीलांबरधरादेवीपातुमांविघ्ननाशिनी॥कर्त्रिह
स्तासदापातुविवादेशत्रुमध्यतः॥ब्रह्मरूपधरादेवी
संग्रामेपातुसर्वदा॥धनुर्बाणधरादेवीपातुमांविघ्न
संकुले॥नागकंकणधरादेवीभोजनेपातुसर्वदा॥

ना॰
कं॰
३

श्रवकर्णामहादेवीश्रायनेपातुसर्वदा॥वीरासनयरादेवीनिद्रायांपातुसर्वदा॥नागोविनकरीपातुदेवीमांसर्वकर्मसु॥छिन्नमुंडधरादेवीकाननेपातुसर्वदा॥चिनामध्यस्थितादेवीमारणेपातुमांसदा॥हिपवर्मधरादेवीपुत्रदारधनादिषु॥खलेकारान्विनादेवीपातुमांहरवलभा॥रक्तरक्तनदीकेंजेह्रींइंस्त्रीफट्समन्विता॥वीजरूपामहादेवीपर्वतेपातुमांसदा॥मणिधरिवज्रिणिवमहाप्रतिसरेतथा॥रक्षरक्षसदाऊंऊंह्रींस्वाहामहेश्वरी॥पुष्पकेतुराजार्हनेकाननेपातुसर्वदा॥ओंह्रीं

वज्र उग्रे ॐ फट् श्रीनरे सर्वकामदा ॥ ॐ उग्रे उग्रे महा
उग्रे पातु प्रज्ञा मां महेश्वरी ॥ ॐ स्वाहा शाक्तिसंयुक्तादारा
त्रिक्तस्तु सर्वदा ॥ ॐ ग्राः ॐ फट् स्वाहा महेशानी पातु ध्रु
ने हराप्रिया ॥ ॐ ह्रीं सर्वविघ्नान्तकारिणी देवी विघ्नान्मां सर्व
दावतु ॥ ॐ पवित्र वज्र भूमे ॐ फट् स्वाहा समन्विता ॥
तरिता पातु मां देवी सर्वविघ्नविनाशिनी ॥ ग्रां ह्रे खेचरे खे
वज्रे खे ॐ फट् स्वाहा समन्विता ॥ पाताले पातु मां देवी
नागिनी नागसंज्ञिका ॥ ह्रीं कारी पातु मां पूर्वे शक्तिरू
पा महेश्वरी ॥ ह्रीं कारी दक्षिणे पातु वधूरूपा महेश्व

ता॰ क॰ ४

री॥ह्रूंस्वरूपामहामायापातुमांक्रोधरूपिणी॥फट्स्व
रूपामहामायापश्चिमेपातुसर्वदा॥उत्तरेपातुमांदेवी
फट्स्वरूपाहरप्रिया॥मध्येमांपातुदेवेशीऊँस्वरूपान
गात्मजा॥नीलवर्णासदापातुसर्वत्रवाग्भवीसदा॥
भवानीपातुभवनेसर्वैश्वर्यप्रदायिनी॥विद्यादानर
तादेवीपातुवक्त्रेसरस्वती॥शास्त्रेवादेचसंग्रामेजले
चविषमेगिरौ॥भीमरूपासदापातुश्मशानेभयना
शिनी॥भूतप्रेतालयेघोरेदुर्गामांभीषणावतु॥पातु
नित्यंमहेशानीसर्वत्रशिवदूतिका॥कवचस्यतुमा

ह्यात्मं नाहं वर्षशतैरपि ॥ शक्कोमिकथ्यितुं देविभवेन्न थे
स्यफलं चयत् ॥ पुत्रदारैं[illegible]बंधनैसर्वदेवेषु सर्वदा ॥
नविद्यतेभयंतस्यान्यत्रपूज्योभवेच्चसः ॥ सुविर्मूर्खो वा
सुविर्वापिकवचंसर्वकामदं ॥ प्रपठत्वासरक्तस्योडः
खशोकविवर्जितः ॥ सर्वशास्त्रेमहेशानिकविराड्भ
वतिध्रुवं ॥ सर्ववागीश्वरोमर्त्योलोकवशोधनेश्वरः ॥
रणेद्यूतेविवादेचजयस्तस्यभवेद्ध्रुवं ॥ पुत्रपौत्रान्वितो
मर्त्योविलासीसर्वयोषितां ॥ शत्रवोदासतांयांतिसर्वे
षांवल्लभःसदा ॥ गर्वीखर्वीभवत्येववादीस्खलतिद

ता· क· ५

श्रीनात्॥ यस्तुश्रवणात्तो यातिदासास्तस्यावनीभुजः॥
प्रसंगात्कथितं ते सर्वं कवचं सर्वकामदं॥ प्रपठन्वा स्मर
न्मर्त्यो शापानुग्रहणे क्षमः॥ आनंदहेदसिस्मनामयि
पः कविराट् भवेत्॥ सर्ववागीश्वरो मर्त्यो लोकवश्यः
सदा सुखी॥ गुरोः प्रसादमासाद्य विद्यां प्राप्य सुगोपि
ता॥ तत्रापि कवचं देवि दुर्लभं भुवनत्रये॥ गुरुर्देवो हरः
साक्षात्पत्नी तस्य हरप्रिया॥ अभेदेन यजेद्यस्तु तस्य सि
द्धिरदूरतः॥ मंत्रोच्चारो महेशानि कथितास्सर्वतः प्रिये
नाभौ ज्योतिः तथार्धे हृदयोपरि चिंतयेत्॥ ऐश्वर्यं स

कवित्वंचसर्ववागीश्वरोनरः॥नित्यंनस्यमहेशानिम
हिलासंगमाचरेत्॥पंचाचाररतोमर्त्यःसिद्धोभवतिना
न्यथा॥ब्रह्माविष्णुश्चरुद्रश्चयेदेवाःहरसत्तमाः॥नेदृष्ट्वा
साधकंदेविलज्जाधुक्ताभवंतिते॥स्वर्गेमर्त्येचपाताले
येदेवाःसिद्धिदायकाः॥प्रशंसंतिसदादेवि॥नेदृष्ट्वासा
धकोत्तमं॥विद्यात्मकाश्चयेदेवाःस्वर्गेमर्त्येरसातले॥
प्रशंसंतिसदासर्वेनेदृष्ट्वासाधकोत्तमं॥इतितेकवचं
देविमयासम्यक्प्रकीर्तितं॥भुक्तिमुक्तिप्रदंसाक्षात्कल्प
वृक्षस्वरूपकं॥आमायायाग्रजंप्रसाधचग्रजंकल्पद्रु

ता॰ कं॰ ८ 6

मालंबनंमोहेनापिमदेनवाविरहितोजाड्येनसत्वस्य
सौ॥सिद्धोसौभुविसर्वदुःखविपदांपारंप्रयात्यंतकोमि
त्रेनस्यन्तपार्श्वेदेविविपदोनश्यंतितस्याशुच॥लिखित्वा
धारयेयस्तुकंठेवामस्तकेभुजे॥तस्यसर्वार्थसिद्धिःस्या
द्यद्यज्जन्मनिवर्तते॥गोरोचनाकुंकुमेनरक्तचंदनकेन
वा॥यावकैर्वामहेशानिलिखेन्मंत्रंसमाहितः॥अष्टम्यां
मंगलदिनेचतुर्दश्यामथापिवा॥संध्यायांदेवदेवेशि
लिखेन्मंत्रंसमाहितः॥मघायांश्रवणेवापिरेवत्यांवावि
शेषतः॥सिंहराशौगतेचंद्रेकर्कटस्थेदिवाकरे॥मीनरा

शैाग्ररौयानेवृश्चिकस्थेशानैश्चरे॥लिखित्वाधारयेद्य
स्तुउग्रताभिमुखोभवेत्॥श्मशानेप्रांतरेवापिशून्या
गारेचतुष्पथे॥निशायांयोलिखेन्मंत्रंतस्यसिद्धिरचं
चला॥भूर्जपत्रेलिखेन्मंत्रंगुरुणांचमहेश्वरी॥ध्यानधा
रणायोगेनधारयेद्यस्तुभक्तितः॥अचिरात्तस्यसिद्धिःस्या
न्नात्रकार्याविचारणा॥इतिश्रीरुद्रयामलेतंत्रेउग्रतारा
कवचंसंपूर्णम्॥

6

ता॰ स॰ १

ॐ श्रीगणेशाय नमः ॥ ॐ श्रीतारानीलसरस्वतीभ्यां नमः
कैलासशिखरे देवं महादेवं महेश्वरं ॥ भवानी रहसि
प्रीत्या पप्रच्छ परमेश्वरं ॥ श्रीदेव्युवाच ॥ कथमीशान
सर्वज्ञ लभंते सिद्धिमुत्तमां ॥ साधकाः सर्वदा येन तन्मे
कथय वै प्रभो ॥ शंकर उवाच ॥ विना पूजां विना ध्यानं
विना ध्यानं विना जप्यं विना बलिं ॥ लभंते येन कल्या
णि तन्मे विगदितः शृणु ॥ नाम्नां सहस्रं तारायाः कथ
यिष्यामि अशेषतः ॥ शृणु देवि सदा भक्त्या भक्तानां पापं
हितं ॥ विना पूजोपहारेण विना जप्येन यत्फलं ॥ तत्फ

लं सकलं देवि कथयिष्यामि तत्त्वतः ॥ अस्य श्रीताराभग
वतीसहस्रनामस्य ॥ श्रीशिव ऋषिः ॥ अनुष्टुप् छंदः ॥ श्रीता
राभगवती देवता ॥ चतुर्वर्गसिद्ध्यर्थे जपे विनियोगः
ॐ तारा रात्रिर्महारात्रिः कालरात्रिः कपालिनी ॥ कालि
का कामदा माया महामाया महोत्सवा ॥ १ ॥ महादानर
ता यज्ञा यज्ञोत्सवविभूषिता ॥ चंद्रवक्त्रा वकोराक्षी वा
रुनेत्रा सुलोचना ॥ २ ॥ त्रिनेत्रा ऊलपद्माक्षी ऊरंगाक्षी
मनोहरा ॥ ब्राह्मी नारायणी ज्योत्स्ना चारुकेशी सुलो
चना ॥ ३ ॥ वाराही वारुणी विद्या महाविद्या महेश्वरी ॥ पिं

ता॰
क॰
२

गङ्विनकेशाचमहाभयस्वरूपिणी ॥४॥ गौरीचंपक
वर्णाचकृशांगीकलहोज्झिता ॥ सर्वानंनस्वरूपाच
सर्वसंकटतारिणी ॥५॥ नित्यानित्यमयानंदाभद्रानी
लसरस्वती ॥ गायत्रीसुचरित्राचकौलव्रतपरायणा ॥६॥
हिरण्यगर्भाभूगर्भाविश्वगर्भायशस्विनी ॥ हिमवत्तन
यादिव्यादिव्यांबरविभूषणा ॥७॥ जगन्माताजगद्धात्री
जगतामुपकारिणी ॥ ऐंद्रीसौम्यातथायाम्यावारुणी
वायवीतथा ॥८॥ आग्नेयीनैरृतीचैवईशानीचंडिकांबि
का ॥ सुमेरुतनयाविद्यासर्वेषामुपकारिणी ॥९॥ लल

क्त

जिह्वासरोजाक्षीमुंडस्र विभूषणा ॥ सर्वानंदमयी
सर्वा सर्वानंदस्वरूपिणी ॥ १० ॥ धृतिर्मेधा तथा लक्ष्मीः
श्रद्धा पन्नगशायिनी ॥ रुक्मिणी जानकी दुर्गा सत्या स
त्यवती दितिः ॥ ११ ॥ कामाख्या मोहदा नंदा नारसिंही स
रस्वती ॥ महादेवरता चंडी चंडदोर्दंडखंडिनी ॥ १२ ॥ दीर्घ
केशी सुकेशी च पिंगकेशा महालकचा ॥ भवानी भवप
त्नी च भवभीतिहरा शिवा ॥ १३ ॥ पौरंदरी तथा विष्णोर्जा
या माहेश्वरी परा ॥ सर्वेषां जननी नित्या चार्वंगी दैत्यना
शिनी ॥ १४ ॥ गौरवरूपा महेशानी कामिनी वरवर्णिनी ॥

ना॰
स॰
३

महाविद्यामहामायामहामेधामहोत्सवा॥२५॥विरू
पाविश्वरूपाचमृडानीमृडवल्लभा॥कोटिचंद्रप्रतीका
शाशतसूर्यसमप्रभा॥२६॥जह्नुकन्यामनोज्ञाचपार्व
तीहरवल्लभा॥कामरूपामहेशानीनित्योत्साहामन
स्विनी॥२७॥वैकुंठनाथपत्नीचनयाशंकरवल्लभा॥का
श्यपीकमलाहस्तापंकजन्मयनेक्षणा॥२८॥माहेश्व
रीहरप्राणापूर्णचंद्रनिभानना॥श्यामाषोडशवर्षा
चशारकुमुदलोचना॥२९॥ब्रह्माणीवैष्णवीशंभोःजा
यागंगाजलेश्वरी॥भागीरथीमनोबुद्धिर्नित्यानेदम

पीमदा॥२०॥हरप्रियागिरिसुताहरपत्नीतपस्वि
नी॥महाव्याधिहरादेवीशुंभासुरनिसूदिनी॥२१॥
महापुण्यप्रभाभीमामधुकैटभनाशिनी॥शंखि
नीचक्रिणीधात्रीहस्तेपुस्तकधारिणी॥२२॥चामुंडा
चपलांबेगाभद्रादैत्यनिकृंतनी॥शांतिर्निद्रामहा
निद्राशुक्लानिद्रावरेण्यका॥२३॥कौमारीकुलजाकुं
तीकौलव्रतपरायणा॥नवदुर्गामदावाराद्रौपदी
द्रुपदात्मजा॥२४॥सहिमगायकालीनानिशुंभप्रा
णनाशिनी॥पद्मिनीवसुपाहंक्षीरोहिणीविंध्य

ना० सं० ५

वासिनी ॥२५॥ शिवशक्तिर्महाशक्तिः शंकरीश
क्तिरुल्लभा ॥ दैत्यप्राणहरा दाक्षीदक्षा दामोदरप्रि
या ॥२६॥ कांतिः हेमकरी बुद्धिः बौद्धाचारपरायणा ॥
श्रीविद्याभैरवीभाव्याभारती भयनाशि ॥ नापिणी नी४
नापिणीविद्यानीला दैत्यविनाशिनी ॥ दाक्षीदान
पराकाली दुर्गा दैत्यविनाशिनी ॥२७॥ पद्मापद्माव
ती कुस्मानदा पुष्पानयो वैश्री ॥ वज्रिणीनीलानी
लावती नीला दैत्यविनाशिनी ॥२८॥ वज्रहस्तानया
कालीनारायणी शिवात्मजा ॥ खड्गिनी खड्गहस्ता

चक्रीखर्परधारिणी ॥३०॥ दिव्यासनादेवमान्यादे
वकन्यापुलोमजा ॥ सुविनीसुखधात्रीचसुखसवे
सुवर्धिनी ॥३१॥ शीलाशीलवतीसत्यासत्याकारव
रप्रदा ॥ वरेण्यावरदावाणीज्ञानिनीज्ञानदामला ॥३२॥
उग्रकालीमहाकालीभद्रकालीचदक्षिणा ॥ भर्गवं
शसमुद्भूताभार्गवीभर्गवल्लभा ॥३३॥ शूलिनीशूल
हस्ताचमहरवरवाहना ॥ महामोसरनारकारकख
र्परधारिणी ॥३४॥ रक्तांबरधरारामारमणीसुरनायि
का ॥ परमानंददाज्येष्ठायोगिनीगणसेविता ॥३५॥

ना॰ ध्रुवा सत्यवती सत्या सत्यभामा नगात्मजा ॥ रौद्री रौद्रस्व-
ना रौद्री रौद्रदैत्यविनाशिनी ॥ ३६ ॥ कौमारी कौशिकी
स॰ विद्या कालदैत्यविनाशिनी ॥ शंभुपत्नी शंभुरता शं-
५ भुजाया महोदरी ॥ ३७ ॥ शिवपत्नी शिवरता शिवजा-
या विकानना ॥ हरपत्नी हररता हरजाया च शूलिनी
॥ ३८ ॥ मदनांतककांता च मदनांतकवल्लभा ॥ गिरि-
जा गिरिकन्या च गिरिशस्य च वल्लभा ॥ ३९ ॥ भूतनाभव्या
भवसृष्टा पार्वती परिपालिता ॥ ब्रह्मकाव्यमरूपाव-
ह्या स्वेच्छप्रवर्त्तिनी ॥ ४० ॥ प्रद्युम्ना प्रद्युम्नप्राणा प्राण

द्याच महेश्वरी ॥ अपांनिधिसमुद्भूतनायरणी च प्रति
ष्ठिता ॥ ४१ ॥ उद्भवा द्रोभिणी देमाश्री गंभीरा परमेश्वरी ॥
करालाक्षणी देहा च कारिणी कंजलोचना ॥ ४२ ॥ शार
ण्यकमलाश्रीत्या विमलानंदवर्धिनी ॥ कपर्दी कल्प
नाहृद्या समनानंदवर्धिनी ॥ उदीर्णा भूषणा भव्या म
रमेना महेश्वरी ॥ ४३ ॥ श्रीमती च शिवानंनाशशिनी
जलकन्यका ॥ महसान्या महश्रेष्ठा ज्येष्ठा प्राणेश्वरी
स्थिरा ॥ ४४ ॥ नमो ह्रीं धांत संहृंद्रीं प्रयतात्मा परिवृता ॥
प्रयोननीरथा हृद्या सर्वलोकप्रकाशिनी ॥ ४५ ॥ मेधा

ना॰ विनीमहावाणीहंसीसंसारतारिणी॥ प्रणतप्राणि
स॰ नामार्तिहारिणीदैत्यमारिणी॥ षट्॥ डाकिनीशाकि
८ नीशीलावरखट्वांगधारिणी॥ कौमुदीकुमुदाकुंदा
कौलिकाकुलजामला॥ षट्॥ गाविनाशगणसंपन्नानगा
6 जाखगवाहिनी॥ चंद्राननामहोग्राचचाक्रमूर्धजशो
भिता॥ षट्॥ मनोज्ञामाधवीमान्यामाननीयामहद्ध
णा॥ चंडमुंडरतिहंत्रीचचंडमुंडविनाशिनी॥ श्रेष्ठाज्ये
ष्ठामघाउध्यायनिष्ठापूर्वफाल्गुनी॥ रक्तबीजनिहं
त्रीचरक्तबीजविनाशिनी॥ पं॰॥ कत्रीहत्रीहकत्रीच

विमलामलवाहिनी ॥ निर्मलाभास्करीभीमामहि
षासुरघातिनी ॥ ५१ ॥ कालिंदीयमुनाहृद्याप्रवनी
बालिकानघा ॥ कौशल्याकौमुदीमाद्रीकंथतीवा
प्रकंथनी ॥ ५२ ॥ सुतारिरहिणीहर्णीहर्णेत्रपापय
स्विनी ॥ संहर्णीचंद्रवदनावालचंद्रसमप्रभा ॥ ५३ ॥ रे
वतीरमणीचित्राचित्रांवरविभूषणा ॥ वीणावी
णावतीविद्याययशोदावयशस्विनी ॥ ५४ ॥ नवपुष्प
समुद्भूतानवपुष्पोत्सवोत्सवा ॥ नवपुष्पस्रजोमा
लामाल्यभूषणभूषिता ॥ ५५ ॥ नवपुष्पसमप्राण

ता॰ सं॰ ७

नवखण्डसमुत्पन्नका ॥ नवखण्डात्मिका खण्डाखण्ड
स्थलविमर्षणा ॥ ५६ ॥ नवखण्डगणोपेता नवख
ण्डापद्मशोभिता ॥ नवखण्डाधिर्यश्रीनाथेन मंडलम
ध्यगा ॥ ५७ ॥ कुलशास्त्रप्रदीपा च कुलमार्गप्रवर्ति
नी ॥ श्मशानभैरवी कालभैरवी भैरवप्रिया ॥ ५८ ॥
गणानंदभैरवी चभैरवी पुरभैरवी ॥ श्रीमायाभै
रवी नीतिभैरवी उग्रभैरवी ॥ ५९ ॥ संमोहभैरवी
नादिभैरवी आदिभैरवी ॥ संहारभैरवी सृष्टिभैर
वी स्थितिभैरवी ॥ ६० ॥ पुंडरीकाननगरक्षिणी पुंडरी

कान्तवल्लभा॥आनंदसुंदरीवीरसुंदरीस्थितिसुंदरी
॥८१॥गुणानंदासुंदरीचक्रसुंदरीपुरसुंदरी॥मायावसुं
दरीसौम्यसुंदरीलोकसुंदरी॥८२॥सुंदरीगणसुंदरी
सुंदरीहरवल्लभा॥मल्लिकाहारवल्लिकामल्लिकाहार
शोभिना॥८३॥नवचंपकवर्णाभानागकेसरशोभि
ना॥जपाकुसुमसंकाशाजपाकुसुमशोभिना॥८४॥
श्रियाप्रियंकरीविस्फोटीनवैद्वविनाशिनी॥ज्ञानेश्व
रीज्ञानधात्रीज्ञानानंदप्रदायिनी॥८५॥गुणगौरवम
नाचगुणशीलसमन्विता॥रूपयौवनसंपन्नारूप

ता॰
स॰
८

8

यौवनश्रीशोभिता ॥ ८८ ॥ गुणाश्रया गुणवती गुणगौर
वसुंदरी ॥ लसन्नागप्रतिप्रख्यानाटकहृदयशोभिता ॥
॥ ८९ ॥ हृत्कमलस्थिता देवी हृत्तशाखोपरिस्थिता ॥ हृ
त्कमध्याब्जनिलया हृत्कमध्यनिवासिनी ॥ ९० ॥ कुमुद्व
ती कुमुदिनी कुमुदा कुमुदाकरी ॥ कौसुंभपुष्परुचिरा
कौसुंभाहरणमल्लिका ॥ ९१ ॥ स्वयंभूपुष्पसंकाशा स्व
यंभूपुष्पधारिणी ॥ स्वयंभूपुष्परसीमद्याध्यानव
ती मदा ॥ ९२ ॥ शुक्रप्रिया शुक्ररता शुक्रमज्जनतत्परा ॥
हर्णी हर्णी सुपर्णी चर्विनिघर्णी पापनाशिनी ॥ ९३ ॥ म

दिग्मोदसमयुक्तामदिग्मोदधारिणी॥सर्वाश्रयास
र्वगणानंदकंदलधारिणी॥७२॥नारीपुष्पसमप्राणा
नारीपुष्पसमुत्सुका॥नारीपुष्पोत्सवानारीनारीपु
ष्परतास्मरी॥७३॥चतुर्भुजादशभुजावाष्टादशभुजा
तथा॥द्विभुजाषड्भुजाष्टारपंकजोपरिसंस्थिता॥७४
कौवेरीकौरवीकौलाकुरुकुल्लाकपालिनी॥परीत
कदलीजंघारंभार्थरामवल्लभा॥७५॥निशाचरीनि
शामूर्त्तिर्निशाचंद्रसमप्रभा॥चांद्रीचंद्रकलाचंद्री
चारुचंद्रसमानना॥७६॥स्रोतस्विनीस्रोतवतीसर्व

ना॰ स॰ ५
9

दुर्गतिनाशिनी॥सर्वाधारासर्वमयीसर्वानंदप्रवर्द्धि
नी॥७७॥सर्वचक्रेश्वरीसर्वासर्वमंत्रमयीसदा॥सह
स्रनयनप्राणासहस्रनयनप्रिया॥७८॥सहस्रशीर्षा
सुषमासदंबासर्वललितिका॥षष्टिकाषष्टिचक्रस्थाष
ड्वर्गफलदायिनी॥७९॥षट्त्रिंशत्पद्ममध्यस्थाषट्
त्रिंशद्दलमध्यगा॥ङंकारवर्णनिलयाङंकाराक्षर
भूषिता॥८०॥हारिणीहारवलिताहारहीरकभूषिता॥
ह्रींकारबीजसहिताह्रींकाररूपशोभिता॥८१॥कंदर्प
सकलाकल्पाकौलिनीकुलतर्पिका॥केतकीकुसु

माघ्राणाकेतकीकृतभूषणा॥८४॥केतकीकुसुमा
सक्ताकेतकीपरिभूषिता॥कर्पूरपूर्णवदनाकलाना
थसमप्रभा॥८५॥कलाकेलिप्रियाकीर्णाकदंबकुसु
मोत्सुका॥कदंबिनीकरिगतिःकुंजरेश्वरगामिनी॥
८६॥खर्वीचर्वोजनद्वंद्वलोचनाखगभूषिता॥खद्यो
तश्चंडलेखाखद्योतद्युतिचंचला॥८७॥गाथागदाग्र
णीगीतागीतवाद्यप्रियागतिः॥गणेश्वरीगणेज्याच
गणपूज्यागुणप्रदा॥८८॥गुणागुणाढ्यागुणसंपत्तिर्गुण
धात्रीगुणात्मिका॥गुर्वीगुरुतरागौरीगाणपत्यफ

श्री

ता॰ स॰ १॰ 10

लम्बदा ॥ घर्माग्रग्रहणी घर्मा घर्मी सिंधुसि वासिनी ॥ घ
घैरी घोरवदना घोरदैत्यविनाशिनी ॥ ८८ ॥ घोषा घोषव
ती हुष्मा घोररूपा घनालया ॥ घर्घरी घातनयना घोरव
क्त्रा चतुर्भुजा ॥ ८९ ॥ चन्द्रवैंदमयी हूर्णा चंद्रास्या चन्द्रान
ना ॥ चलच्चकोरनयना चलत्खंजनलोचना ॥ ९० ॥ चलदं
भोजवदना चलदंभोजलोचना ॥ छत्री छत्रप्रिया छत्री
छत्रचामरशोभिता ॥ ९१ ॥ छलाया छलमंत्रस्था छलरू
पा छलाहरा ॥ छकारवर्णनिलया छकाराया छलप्रि
या ॥ ९२ ॥ छद्मिनी छद्मनिरता छद्मी छद्मनिवासिनी ॥

जगन्नाथप्रियाजीवाजगन्नाथरताजरा॥९३॥जीर्णाजी
र्णमनवनिताजीर्णरूपशोभिता॥जामाख्यवरदाजैत्रा
जामलार्ज्जुनघातिनी॥९४॥जराजराविनाजेभाजेभारा
तिवरप्रदा॥जिताजयिश्रीवरदाजवदाश्रीजयप्रदा॥९५॥
झल्लटीझिंगरातिर्झल्लीझरीझर्झरिकातथा॥टंकारका
रिणीटीकाकारिणीटंकधारिणी॥ठक्कुराक्रीडमरु
काडाक्कुरीडमरुप्रिया॥ढकारवाद्यढक्कारीढलसी
सालभंजिका॥९६॥णलिनीलिनिकाणीर्णिताराणार
णिकातथा॥तंत्रविज्ञातंत्ररतातंत्रविद्याचतंत्रदा॥९७॥

नेत्रिकानेत्रविद्याचनेत्रमार्गानेत्रपा॥नेत्रयात्रीनेत्रका
रीनेत्रनारीनिरानेत्रा॥८९॥नेत्रपःप्रभावनेत्रज्ञानेत्रमार
फलप्रदा॥नपद्मानेत्रलिनीनीणीनेत्रीयानलक्ष्मीरुषा
॥९०॥नघारकारसम्पूर्णास्यान्नघारकरमंडिता॥नहिनोश्च
समानास्यान्नहिंनोश्चसमप्रभा॥१॥नघारकारनल्पांगी
नघारकरसुंदरी॥नघारयामनल्पास्यान्नघारोश्चसमा
नना॥२॥नहिंनोश्चसनानानास्पीनालांगीनालवर्जिता॥ना
लस्वरेणसहितानालस्वरविभूषिता॥३॥थकारकूटनि
लयाथकारान्तरमालिनी॥दयावतीदीनरतादुःखदा

विघ्ननाशिनी ॥ दौर्भाग्यदुःखदलिनी दौर्भाग्यपदनाशि
नी ॥ [illegible]दनी दीनबंधुस्वदानवेंद्रविमर्दिनी ॥ ५ ॥ दानवदा
त्रीदानपरादानसमाननतोषिता ॥ दैत्यादिसेविता दां
नादामोदरपरायणा ॥ दधीचिवरदा दुष्टदानवेंद्रविना
शिनी ॥ ७ ॥ दीर्घनेत्रा दीर्घकुचा दीर्घनासा च दीर्घिका ॥ दा
रिद्र्यदुःखशमनी दुष्टासुरनिसूदिनी ॥ ८ ॥ दंबिका दंभ
दा दंता दनुजेंद्रविनाशिनी ॥ धनधान्यप्रदा धन्या धने
श्वरधनप्रदा ॥ ९ ॥ धर्मिणी धर्मिका धर्मी धर्मा धर्मप्रव
र्तिनी ॥ धनाध्यक्षा धनप्रीता धनार्चा धनतोषिता ॥ धी

ना॰ राधेयैवनीक्षणाधवलांभोजसन्निभा॥२०॥धरिणीधारिणी
स॰ धात्रीधरित्रीधवलासदा॥धार्मिकाधर्मसहिताधर्मनि
१२ न्दकवर्जिता॥२१॥नवीनानीरजाक्षीचनिम्ननाभिर्नरेश्वरी
नूतनांभोजनयनानवीनांभोजसुंदरी॥२२॥नागरीनग
राजेष्टानगराजसुतानगा॥नागराजगतिर्नागराजमा
लाविभूषिता॥२३॥नगेश्वरीनगाहृद्यानगराजकुलेश्व
री॥नवैनैंडकलानंदीनंदिकेश्वरवल्लभा॥२४॥नीरजाक्षी
रजाक्षीचनीरजद्वंद्वलोचना॥नीरजप्रसूतानीरजाभानीर
निर्मलदेहिनी॥२५॥नागयज्ञोपवीताढ्यानागयज्ञोप

वीतिका॥नागकेसरसंतुष्टानागकेसरमालिनी॥२६॥
नवीनकीनकीऊंदमकरंदप्रपूरिता॥नायिकानाय
कश्रीनानायकप्रीतितोषिता॥२७॥नायकप्रेममहिता
नायकप्रेमतोषिता॥नायकानंदनिलयानायकानंद
कारिणी॥२८॥नर्मकर्मरतानित्यानर्मकर्मपरायणा॥
नर्मकर्मप्रियानर्मानर्मधर्मपरायणा॥२९॥नर्मप्रीता
नर्मरतानर्मध्यानपरायणा॥नर्मकर्मैकमहितानर्मक
र्मैकपालिका॥३०॥नरनारीगुणप्रीतानरनारीवरप्रदा
नारायणप्रियानिष्कानिष्कवर्णानतोहा॥३१॥प्रघ्न

ना॰ स॰ १३

13

प्रियापुष्परतापौष्पीपानपरायणा ॥ पौष्पीप्रियापुष्प
पुष्पापुष्पदामविभूषिता ॥ २२ ॥ पुण्यदापूर्णिमापुण्या
पुण्यकोटिफलप्रदा ॥ पुराणागमवेद्या च पुराणागम
तोषिता ॥ २३ ॥ पुराणागममध्या च पुराणागमगोपिता ॥
पुराणगोचरा सर्वा सर्वाप्रौढविलासिनी ॥ २४ ॥ प्रह्लाद
ह्लादया ह्लादगेहिनी पुण्यचारिणी ॥ फलडणी फलडणी
प्रीता फलडणप्रेमधारिणी ॥ फलडफलप्रदा चैव फणि
राजविभूषिता ॥ फणाकारा फणिप्रीता फणिहारविभू
षिता ॥ २५ ॥ फणीशाकृतसर्वाङ्गा सुभगा फणिवाहिनी ॥

फणिश्रीनाफणिरत्नाफणिकंकणधारिणी ॥२७॥ फल
दात्रीफलासक्ताफलाभरणभूषिता ॥ फकारकूटस
र्वांगफालक्षणनंदवर्धिनी ॥२८॥ वासुदेवरतावित्तावि
त्तावित्तानकारिणी ॥ वाणीरताबलाकीर्णाबलपीयू
षरोचिषा ॥ बलावसुमतीविद्याविद्याहारविभूषिता ॥
विद्यावतीवैद्यपदप्रीताचैवसरस्वती ॥३०॥ वाणीविला
सकरणीवरांगस्थावराननना ॥ विसोर्वेस्वस्थलस्थाव
वागवतीविंध्यवासिनी ॥३१॥ वारुणीनरसंस्थाचवर्ह
णीऊस्मोत्सुका ॥ भूतिदाभयदाभानोरंशुव्रातसम

ना॰ श्रमा॥३२॥भार्गवेज्याभर्गोहृज्याभारद्वाजनमस्कृता॥भी
स॰ तिहाभयसंपन्नाभीमाकाराभ्रमंदरी॥३३॥मायायायरी
१४ मानवतीमानसंमानतत्परा॥माधवानंददामाधीम
दिरामदिरेक्षणा॥३४॥महोत्साहगुणोपेतामहतीम
हदद्भुता॥मदिरामोदवलितामदिरामञ्जनेरता॥३५॥
यशोधरीयशोविद्यायशोदानंदवर्धिनी॥यादवानंद
करणीयादवानंदवर्धिनी॥३६॥यज्ञश्रीनायज्ञमयी
यज्ञकर्मविभूषिता॥रामप्रियारामरतारामतोषण
तत्परा॥३७॥राज्ञीराजकुलेज्याचराजराजेश्वरीरमा॥

रामिणी रमणी रम्या रमानंदप्रदायिनी ॥ ३८ ॥ रजनीकर
रमणी स्मरकोमलविलोचना ॥ लांगुली प्रेमसंबद्धा लां
गली प्रणयप्रिया ॥ ३९ ॥ लाक्षारुणा ललनालीलाली
रेवतीनया ॥ लेकेश्वरगणश्रीता लकेशवरदायिनी ॥ ४०
लवंगकुसुमप्रीता लवंगकुसुमस्रजा ॥ बालाबिंबस्व
ह्रहिणी बिंबस्वप्रेमधारिणी ॥ ४१ ॥ शावला शारला शाल्मा
शरण्या श्रीमरुन्नुणा ॥ षट्कोणचक्रमध्यस्था संपदा
हेविशोभिता ॥ ४२ ॥ हेमांबा च तथाज्ञा च इडा ईश्वरवल्ल
भा ॥ उग्रास्या वनथाचोणा क्रकाराक्रक्रतोद्भवा ॥ ४३ ॥

ता॰ स॰ १५

15

ऌकारस्वरकूटस्याऌकारस्वरभूषिता ॥ षष्ठाचैषातथा
चोष्ठाऔकारादहरयारिणी ॥ ४४ ॥ श्रीमास्त्रकारवलितास
र्वागमसुगोपिता ॥ यइदंपठतेस्तोत्रंप्रत्यहंभक्तिभाव
तः ॥ ४५ ॥ दिवारात्रौतथासंध्यासमयेसमहेश्वरः ॥ स्तव
मात्रस्यपाठेनराजाकिंकरतामियात् ॥ सर्वागमेषुसूक्ष्मः
स्यात्सर्वतंत्रेस्वयंहरः ॥ शिवस्याननेचशय्यायांसूत्यागा
रेचलक्ष्मणे ॥ ४६ ॥ यःपठेछृणुयाद्वापिसयोगीनात्रसंश
यः ॥ यानिनामानिनित्यस्मिंस्तंसर्गान्तरवैरिणः ॥ ग्राह्या
नितानिकल्याणानान्यानितकदाचन ॥ सिंहरकरवी

णयैः पुष्पैर्लोहितकैः शिवां ॥ ४९ ॥ यो वै येन क्रिमावेन
नस्य साध्येत् किंचन ॥ वातस्तंभं जलस्तंभं गतिस्तंभं वि
वस्वतः ॥ ५० ॥ वह्नेः शैत्यं करोत्येव बलवस्यास्य कीर्तना
त् ॥ स्त्रियमाकर्षयेत्तूर्णमरीन्मर्दयते हठात् ॥ ५१ ॥ मोह
येद्राजदारांश्च देवानपि वशं नयेत् ॥ यः पठेच्छृणुया
द्वापि चैकचित्तेन सर्वदा ॥ ५२ ॥ स दीर्घायुः सुखी वाग्मी
वाणी तस्य वशंकरी ॥ सर्वतीर्थाभिषेके च गयाश्राद्धे
न यत्फलं ॥ ५३ ॥ तत्फलेनस्य सकलं यः पठेदेकचेतनः
येषामाराधने श्रद्धा ये च मामपि नम्रमयन्तः ॥ तेषां कृता

र्थं सर्वत्रगतिर्देवीपदालयं ॥ ५५ ॥ अनवृष्टकालनामध्ये
ता॰ स्थितादेडेनताडयेत् ॥ जप्त्वास्तंवानमस्कृत्यगच्छेदेत्या
म॰ रिकापदं ॥ ५६ ॥ ग्रहंस्थावचनंदेशंपोनवृष्यांशान्तिवासरे ॥
१८ संक्रांतौमंडलेराज्ञावमावस्यांचयोर्चयेत् ॥ ५७ ॥ वर्षंत्या
16 प्यवदेवेशिनस्साथीनाश्चसिद्धयः ॥ मनवन्ताचयाना
रीदौर्भाग्यपदपीडिता ॥ ५८ ॥ वंध्यावाकाकवंध्यावाम
तपुत्राचयानरा ॥ धनधान्यविहीनाचरोगशोकाकुला
चया ॥ ५९ ॥ साऽपिचैतन्महादेविभूर्जपत्रेलिखित्वाधारयेत् ॥ व
सर्वेभुजेचवध्रीयात्सर्वसौख्यवतीभवेत् ॥ ६० ॥ एवंतु

मात्रपित्राद्योदुःखेनपरिपीडितः॥सभार्योव्यसनेघो
रेविवादेशत्रुसंकटे॥८१॥चक्षुरोगेणपाण्डुत्वेसर्वत्रपरि
पीडितः॥स्मरणादस्यकल्मषाणिसंक्षयंयान्तिहरनतः॥८२
पूजनीयाप्रयत्नेनशून्यागारेशिवालये॥बिल्ववृक्षतन
लेदेविसर्वदाकुलमण्डले॥८३॥शर्करासर्वसंयुक्तैःभ
क्ष्यपेडुकैर्गुडैःसमण्डलैः॥घृतपायससंयुक्तैःनैवेद्यैश्चयथा
विधैः॥८४॥निवेदितेनयद्द्रव्यंभोक्तव्यंतद्धियानतः॥
नत्वचेदंजनेमोहाज्ञानेनकुप्यन्तिदेवताः॥८५॥अनेनैव
विधानेनयोर्चयेत्परमेश्वरीं॥सम्भूमिंवालयेद्देविसा

ता॰ स॰ ८२

त्वाद्देवो न संशयः ॥८६॥ महाशंखेन कल्याणि सर्वं का
र्यं जपादिकं कुल सर्वस्वकस्यैव प्रभावं वर्णितं मया ॥८७॥
न शक्यते समाख्यातुं वर्षकोटिशतैरपि ॥ किंचिन्मया
च चापल्यात्कथितं परमेश्वरी ॥८८॥ जन्मान्तरसहस्रेण
वर्णितुं नैव शक्यते ॥ कुलीनाय प्रदातव्यं नाराभक्तिप
राय च ॥८९॥ अन्यभक्ताय नो देयं वैष्णवाय विशेषतः ॥
कुलीनाय महेच्छाय भक्तिश्रद्धापराय च ॥९०॥ महात्मने
महादेयं परीक्षितगुणाय च ॥ नाभक्ताय प्रदातव्यं यस्ते
नरपराय च ॥९१॥ न देयं देवदेवेषि गोप्यं सर्वागमेसदा

पठनीयं सदा देवि सर्वावस्थासु सर्वदा ॥७४॥ यः स्तोत्रं कु
लनायिके सकृदपि भक्त्या पठेन्मानवः स प्राप्नुयाच्च वै धै
र्येनेश्वरसमो विद्यया भवेद्वाक्पतिः ॥ सौंदर्येण च मूर्ति
मान्मनसिजः कान्त्या च शीतद्युतिः शान्त्या शंकर एव सं
र्वैर्विभवैर्धर्मैः पतिर्नीत्या यथा ॥७५॥ इति श्रीतारार्णवे तारा
सहस्रनामस्तोत्रं समाप्तम् ॥

९८

ता॰ ॐ श्रीगणेशाय नमः ॥ श्रीभैरव उवाच ॥ ॐ शृणु देवि प्र
स्तो॰ वक्ष्यामि स्तोत्रं परमदुर्लभम् ॥ नारायाः श्रीस्वरेश्वर्याः
१ तारणं सर्वसंकटान् ॥ यस्य पठित्वा लभेत् सिद्धिं सर्वकार्ये
षु सर्वदा ॥ देव्याः नीलसरस्वत्याः प्रसादादीप्सितप्रदम् ॥
सर्वार्थसाधकं पुण्यं शत्रुनाशकमद्भुतम् ॥ विद्याप्रदं
वियच्चारिदेवज्ञानप्रसादनम् ॥ विपक्षविजयं श्रीम
त्स्वभावव्रुद्धिवर्धनम् ॥ ध्यानेन तस्याः प्रवक्ष्यामि नाराया
योगसिद्धिदम् ॥ सर्वाभीष्टप्रदं सर्वदेवदेवीप्रसादन
म् ॥ येन ध्यानेन वै सम्यं तारा प्रादुर्भविष्यति ॥ श्वेतवस्त्र

परिछन्नां खड्गां मद्भबाणौ हंनाम्॥ चंद्रार्धशेखरां क
र्त्रीकपालपाणिकांशुभाम्॥ त्रिनेत्रां त्रिपदारूढां त्रि
कारणनमस्कृताम्॥ नारीवैवोग्रताराचतथानील
सरस्वतीम्॥ एवंध्यात्वाजपेन्मन्त्रीश्रान्तोत्मभीष्टमा
प्नुवे॥ अस्यश्रीस्तोत्रराजस्यभैरवऋषिरीतिनः॥ अ
नुष्टुप्छंदश्श्रीक्रनारात्रिह्रपिणीशुभा॥ देवतासर्व
कार्यार्थसिद्धौमंत्रीनियोजयेत्॥ ॐतारायैतेनमस्त
भ्यमेगलायैनमोनमः॥ देव्यैतथोग्रतारायैविजया
यैनमोनमः॥ श्रियैनीलसरस्वत्यैवागीश्वर्यैनमो

ता॰ स्तो॰ २

नमः ॥ त्रैलोक्यमातर्जगतां सिद्धिदायै नमो नमः ॥ आ
पत्सु जमहाधांतनाशिन्यै ते नमो नमः ॥ चंडिकायै
तपस्सिद्धिदायिन्यै ते नमो नमः ॥ समाह्वर्ध्यै समलो
कनारिण्यै श्रीभुवे नमः ॥ विशेषकार्यसिद्ध्यर्थप्रय
त्नायै नमो नमः ॥ ब्रह्मणः श्रीप्रदायै ते ब्राह्म्यै देव्यै
नमो नमः ॥ विष्णोः प्रियायै पद्मायै वैष्णव्यै ते नमो
नमः ॥ रुद्रलोकप्रिये रुद्ररूपिण्यै ते नमो नमः ॥ ऊ
र्ध्वकेशप्रियादेव्यै व्योमकेशप्रिये नमः ॥ नीलकंठ
प्रियायै ते नमस्त्र्यंबके नमो नमः ॥ नारायण्यै मातम

स्यैनारिरूपिण्यैनेनमोनमः॥फेरव्यंबावज्रपुष्पस्तुत्यैसि
द्धिप्रियेनमः॥मधुपायसक्षीराज्यप्रियाशनप्रहर्षि
णी॥रूपिण्यैसर्वनेत्रार्थसारायैनेनमोनमः॥नारिके
लोदकाशिन्यैप्रसन्नायैनमोनमः॥ब्रह्माण्डोत्पत्तिस
पत्तिरूपिण्यैसद्धियेनमः॥ब्रह्माण्डगर्भवासिन्यैमा
त्रायैनेनमोनमः॥वशीकरणविद्वेषकीलनोच्चाट
मोहने॥मारणस्तंभनेनेत्रसिद्धिदाय्यैनेनमोनमः॥दैत्यो
घशालभकारमंडलेविषवर्षिणी॥रूपायैजगन्मा
तृरूपिण्यैनेनमोनमः॥सूर्यचंद्राग्निनेत्रायैनमस्त्रिभु

ना॰
स्तो
३

नमो नमः ॥ इन्द्रादिदेववन्द्यायै राज्ञां राज्यश्रियै नमः ॥
परमात्मास्वरूपायै नारायै ते नमो नमः ॥ इतीदं स्तोत्र
राजेशं महाभैरवभाषितम् ॥ मंत्राणां सारसर्वस्वं सि
द्धिदं सर्वकर्मणाम् ॥ महाविघ्नोपशमने धनधान्यस
मृद्धिदम् ॥ शत्रुसंहारकं शत्रुसैन्यव्यूहविनाशनम् ॥
इति श्रीनारास्तोत्रं समाप्तम् ॥ १२८ ५१ श्रीनगरे लिखितमिदं